9.001.01a स्वादिष्ठया मदिष्ठया पवस्व सोम धारया ।

9.001.01c इन्द्राय पातवे सुतः ॥

9.001.02a रक्षोहा विश्वचर्षणिरभि योनिमयोहतम् ।

9.001.02c द्रुणा सधस्थमासदत् ॥

9.001.03a वरिवोधातमो भव मंहिष्ठो वृत्रहन्तमः ।

9.001.03c पर्षि राधो मघोनाम् ॥

9.001.04a अभ्यर्ष महानां देवानां वीतिमन्धसा ।

9.001.04c अभि वाजमुत श्रवः ॥

9.001.05a त्वामच्छा चरामसि तदिदर्थं दिवेदिवे ।

9.001.05c इन्दो त्वे न आशसः ॥

9.001.06a पुनाति ते परिस्रुतं सोमं सूर्यस्य दुहिता ।

9.001.06c वारेण शश्वता तना ॥

9.001.07a तमीमण्वीः समर्य आ गृभ्णन्ति योषणो दश ।

9.001.07c स्वसारः पार्ये दिवि ॥

9.001.08a तमीं हिन्वन्त्यग्रुवो धमन्ति बाकुरं दृतिम् ।

9.001.08c त्रिधातु वारणं मधु ॥

9.001.09a अभीममघ्न्या उत श्रीणन्ति धेनवः शिशुम् ।

9.001.09c सोममिन्द्राय पातवे ॥

9.001.10a अस्येदिन्द्रो मदेष्वा विश्वा वृत्राणि जिघ्नते ।

9.001.10c शूरो मघा च मंहते ॥

9.002.01a पवस्व देववीरति पवित्रं सोम रंह्या ।

9.002.01c इन्द्रमिन्दो वृषा विश ॥

9.002.02a आ वच्यस्व महि प्सरो वृषेन्दो द्युम्नवत्तमः ।

9.002.02c आ योनिं धर्णसिः सदः ॥

9.002.03a अधुक्षत प्रियं मधु धारा सुतस्य वेधसः ।

9.002.03c अपो वसिष्ट सुक्रतुः ॥

9.002.04a महान्तं त्वा महीरन्वापो अर्षन्ति सिन्धवः ।

9.002.04c यद्गोभिर्वासयिष्यसे ॥

9.002.05a समुद्रो अप्सु मामृजे विष्टम्भो धरुणो दिवः ।

9.002.05c सोमः पवित्रे अस्मयुः ॥

9.002.06a अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः ।

9.002.06c सं सूर्येण रोचते ॥

9.002.07a गिरस्त इन्द ओजसा मर्मृज्यन्ते अपस्युवः ।

9.002.07c याभिर्मदाय शुम्भसे ॥

9.002.08a तं त्वा मदाय घृष्वय उ लोककृत्नुमीमहे ।

9.002.08c तव प्रशस्तयो महीः ॥

9.002.09a अस्मभ्यमिन्दविन्द्रयुर्मध्वः पवस्व धारया ।

9.002.09c पर्जन्यो वृष्टिमाँ इव ॥

9.002.10a गोषा इन्दो नृषा अस्यश्वसा वाजसा उत ।

9.002.10c आत्मा यज्ञस्य पूर्व्यः ॥

9.003.01a एष देवो अमर्त्यः पर्णवीरिव दीयति ।

9.003.01c अभि द्रोणान्यासदम् ॥

9.003.02a एष देवो विपा कृतोऽति ह्वरांसि धावति ।

9.003.02c पवमानो अदाभ्यः ॥

9.003.03a एष देवो विपन्युभिः पवमान ऋतायुभिः ।

9.003.03c हरिर्वाजाय मृज्यते ॥

9.003.04a एष विश्वानि वार्या शूरो यन्निव सत्वभिः ।

9.003.04c पवमानः सिषासति ॥

9.003.05a एष देवो रथर्यति पवमानो दशस्यति ।

9.003.05c आविष्कृणोति वग्वनुम् ॥

9.003.06a एष विप्रैरभिष्टुतोऽपो देवो वि गाहते ।

9.003.06c दधद्रत्नानि दाशुषे ॥

9.003.07a एष दिवं वि धावति तिरो रजांसि धारया ।

9.003.07c पवमानः कनिक्रदत् ॥

9.003.08a एष दिवं व्यासरत्तिरो रजांस्यस्पृतः ।

9.003.08c पवमानः स्वध्वरः ॥

9.003.09a एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः ।

9.003.09c हरिः पवित्रे अर्षति ॥

9.003.10a एष उ स्य पुरुव्रतो जज्ञानो जनयन्निषः ।

9.003.10c धारया पवते सुतः ॥

9.004.01a सना च सोम जेषि च पवमान महि श्रवः ।

9.004.01c अथा नो वस्यसस्कृधि ॥

9.004.02a सना ज्योतिः सना स्वर्विश्वा च सोम सौभगा ।

9.004.02c अथा नो वस्यसस्कृधि ॥

9.004.03a सना दक्षमुत क्रतुमप सोम मृधो जहि ।

9.004.03c अथा नो वस्यसस्कृधि ॥

9.004.04a पवीतारः पुनीतन सोममिन्द्राय पातवे ।

9.004.04c अथा नो वस्यसस्कृधि ॥

9.004.05a त्वं सूर्ये न आ भज तव क्रत्वा तवोतिभिः ।

9.004.05c अथा नो वस्यसस्कृधि ॥

9.004.06a तव क्रत्वा तवोतिभिर्ज्योक्पश्येम सूर्यम् ।

9.004.06c अथा नो वस्यसस्कृधि ॥

9.004.07a अभ्यर्ष स्वायुध सोम द्विबर्हसं रयिम् ।

9.004.07c अथा नो वस्यसस्कृधि ॥

9.004.08a अभ्यर्षानपच्युतो रयिं समत्सु सासहिः ।

9.004.08c अथा नो वस्यसस्कृधि ॥

9.004.09a त्वां यज्ञैरवीवृधन्पवमान विधर्मणि ।

9.004.09c अथा नो वस्यसस्कृधि ॥

9.004.10a रयिं नश्चित्रमश्विनमिन्दो विश्वायुमा भर ।

9.004.10c अथा नो वस्यसस्कृधि ॥

9.005.01a समिद्धो विश्वतस्पतिः पवमानो वि राजति ।

9.005.01c प्रीणन्वृषा कनिक्रदत् ॥

9.005.02a तनूनपात्पवमानः शृङ्गे शिशानो अर्षति ।

9.005.02c अन्तरिक्षेण रारजत् ॥

9.005.03a ईळेन्यः पवमानो रयिर्वि राजति द्युमान् ।

9.005.03c मधोर्धाराभिरोजसा ॥

9.005.04a बर्हिः प्राचीनमोजसा पवमान स्तृणन्हरिः ।

9.005.04c देवेषु देव ईयते ॥

9.005.05a उदातैर्जिहते बृहद्द्वारो देवीर्हिरण्ययीः ।

9.005.05c पवमानेन सुष्टुताः ॥

9.005.06a सुशिल्पे बृहती मही पवमानो वृषण्यति ।

9.005.06c नक्तोषासा न दर्शते ॥

9.005.07a उभा देवा नृचक्षसा होतारा दैव्या हुवे ।

9.005.07c पवमान इन्द्रो वृषा ॥

9.005.08a भारती पवमानस्य सरस्वतीळा मही ।

9.005.08c इमं नो यज्ञमा गमन्तिस्रो देवीः सुपेशसः ॥

9.005.09a त्वष्टारमग्रजां गोपां पुरोयावानमा हुवे ।

9.005.09c इन्दुरिन्द्रो वृषा हरिः पवमानः प्रजापतिः ॥

9.005.10a वनस्पतिं पवमान मध्वा समङ्ग्धि धारया ।

9.005.10c सहस्रवल्शं हरितं भ्राजमानं हिरण्ययम् ॥

9.005.11a विश्वे देवाः स्वाहाकृतिं पवमानस्या गत ।

9.005.11c वायुर्बृहस्पतिः सूर्योऽग्निरिन्द्रः सजोषसः ॥

9.006.01a मन्द्रया सोम धारया वृषा पवस्व देवयुः ।

9.006.01c अव्यो वारेष्वस्मयुः ॥

9.006.02a अभि त्यं मद्यं मदमिन्दविन्द्र इति क्षर ।

9.006.02c अभि वाजिनो अर्वतः ॥

9.006.03a अभि त्यं पूर्व्यं मदं सुवानो अर्ष पवित्र आ ।

9.006.03c अभि वाजमुत श्रवः ॥

9.006.04a अनु द्रप्सास इन्दव आपो न प्रवतासरन् ।

9.006.04c पुनाना इन्द्रमाशत ॥

9.006.05a यमत्यमिव वाजिनं मृजन्ति योषणो दश ।

9.006.05c वने क्रीळन्तमत्यविम् ॥

9.006.06a तं गोभिर्वृषणं रसं मदाय देववीतये ।

9.006.06c सुतं भराय सं सृज ॥

9.006.07a देवो देवाय धारयेन्द्राय पवते सुतः ।

9.006.07c पयो यदस्य पीपयत् ॥

9.006.08a आत्मा यज्ञस्य रंह्या सुष्वाणः पवते सुतः ।

9.006.08c प्रत्नं नि पाति काव्यम् ॥

9.006.09a एवा पुनान इन्द्रयुर्मदं मदिष्ठ वीतये ।

9.006.09c गुहा चिद्दधिषे गिरः ॥

9.007.01a असृग्रमिन्दवः पथा धर्मन्नृतस्य सुश्रियः ।

9.007.01c विदाना अस्य योजनम् ॥

9.007.02a प्र धारा मध्वो अग्रियो महीरपो वि गाहते ।

9.007.02c हविर्हविष्षु वन्द्यः ॥

9.007.03a प्र युजो वाचो अग्रियो वृषाव चक्रदद्वने ।

9.007.03c सद्माभि सत्यो अध्वरः ॥

9.007.04a परि यत्काव्या कविर्नृम्णा वसानो अर्षति ।

9.007.04c स्वर्वाजी सिषासति ॥

9.007.05a पवमानो अभि स्पृधो विशो राजेव सीदति ।

9.007.05c यदीमृण्वन्ति वेधसः ॥

9.007.06a अव्यो वारे परि प्रियो हरिर्वनेषु सीदति ।

9.007.06c रेभो वनुष्यते मती ॥

9.007.07a स वायुमिन्द्रमश्विना साकं मदेन गच्छति ।

9.007.07c रणा यो अस्य धर्मभिः ॥

9.007.08a आ मित्रावरुणा भगं मध्वः पवन्त ऊर्मयः ।

9.007.08c विदाना अस्य शक्मभिः ॥

9.007.09a अस्मभ्यं रोदसी रयिं मध्वो वाजस्य सातये ।

9.007.09c श्रवो वसूनि सं जितम् ॥

9.008.01a एते सोमा अभि प्रियमिन्द्रस्य काममक्षरन् ।

9.008.01c वर्धन्तो अस्य वीर्यम् ॥

9.008.02a पुनानासश्चमूषदो गच्छन्तो वायुमश्विना ।

9.008.02c ते नो धान्तु सुवीर्यम् ॥

9.008.03a इन्द्रस्य सोम राधसे पुनानो हार्दि चोदय ।

9.008.03c ऋतस्य योनिमासदम् ॥

9.008.04a मृजन्ति त्वा दश क्षिपो हिन्वन्ति सप्त धीतयः ।

9.008.04c अनु विप्रा अमादिषुः ॥

9.008.05a देवेभ्यस्त्वा मदाय कं सृजानमति मेष्यः ।

9.008.05c सं गोभिर्वासयामसि ॥

9.008.06a पुनानः कलशेष्वा वस्त्राण्यरुषो हरिः ।

9.008.06c परि गव्यान्यव्यत ॥

9.008.07a मघोन आ पवस्व नो जहि विश्वा अप द्विषः ।

9.008.07c इन्दो सखायमा विश ॥

9.008.08a वृष्टिं दिवः परि स्रव द्युम्नं पृथिव्या अधि ।

9.008.08c सहो नः सोम पृत्सु धाः ॥

9.008.09a नृचक्षसं त्वा वयमिन्द्रपीतं स्वर्विदम् ।

9.008.09c भक्षीमहि प्रजामिषम् ॥

9.009.01a परि प्रिया दिवः कविर्वयांसि नप्त्योर्हितः ।

9.009.01c सुवानो याति कविक्रतुः ॥

9.009.02a प्रप्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहे ।

9.009.02c वीत्यर्ष चनिष्ठया ॥

9.009.03a स सूनुर्मातरा शुचिर्जातो जाते अरोचयत् ।

9.009.03c महान्मही ऋतावृधा ॥

9.009.04a स सप्त धीतिभिर्हितो नद्यो अजिन्वदद्रुहः ।

9.009.04c या एकमक्षि वावृधुः ॥

9.009.05a ता अभि सन्तमस्तृतं महे युवानमा दधुः ।

9.009.05c इन्दुमिन्द्र तव व्रते ॥

9.009.06a अभि वह्निरमर्त्यः सप्त पश्यति वावहिः ।

9.009.06c क्रिविर्देवीरतर्पयत् ॥

9.009.07a अवा कल्पेषु नः पुमस्तमांसि सोम योध्या ।

9.009.07c तानि पुनान जङ्घनः ॥

9.009.08a नू नव्यसे नवीयसे सूक्ताय साधया पथः।

9.009.08c प्रत्नवद्रोचया रुचः॥

9.009.09a पवमान महि श्रवो गामश्वं रासि वीरवत्।

9.009.09c सना मेधां सना स्वः॥

9.010.01a प्र स्वानासो रथा इवार्वन्तो न श्रवस्यवः।

9.010.01c सोमासो राये अक्रमुः॥

9.010.02a हिन्वानासो रथा इव दधन्विरे गभस्त्योः।

9.010.02c भरासः कारिणामिव॥

9.010.03a राजानो न प्रशस्तिभिः सोमासो गोभिरञ्जते।

9.010.03c यज्ञो न सप्त धातृभिः॥

9.010.04a परि सुवानास इन्दवो मदाय बर्हणा गिरा।

9.010.04c सुता अर्षन्ति धारया॥

9.010.05a आपानासो विवस्वतो जनन्त उषसो भगम्।

9.010.05c सूरा अण्वं वि तन्वते॥

9.010.06a अप द्वारा मतीनां प्रत्ना ऋण्वन्ति कारवः।

9.010.06c वृष्णो हरस आयवः॥

9.010.07a समीचीनास आसते होतारः सप्तजामयः।

9.010.07c पदमेकस्य पिप्रतः ॥

9.010.08a नाभा नाभिं न आ ददे चक्षुश्चित्सूर्ये सचा ।

9.010.08c कवेरपत्यमा दुहे ॥

9.010.09a अभि प्रिया दिवस्पदमध्वर्युभिर्गुहा हितम् ।

9.010.09c सूरः पश्यति चक्षसा ॥

9.011.01a उपास्मै गायता नरः पवमानायेन्दवे ।

9.011.01c अभि देवाँ इयक्षते ॥

9.011.02a अभि ते मधुना पयोऽथर्वाणो अशिश्रयुः ।

9.011.02c देवं देवाय देवयु ॥

9.011.03a स नः पवस्व शं गवे शं जनाय शमर्वते ।

9.011.03c शं राजन्नोषधीभ्यः ॥

9.011.04a बभ्रवे नु स्वतवसेऽरुणाय दिविस्पृशे ।

9.011.04c सोमाय गाथमर्चत ॥

9.011.05a हस्तच्युतेभिरद्रिभिः सुतं सोमं पुनीतन ।

9.011.05c मधावा धावता मधु ॥

9.011.06a नमसेदुप सीदत दध्नेदभि श्रीणीतन ।

9.011.06c इन्दुमिन्द्रे दधातन ॥

9.011.07a अमित्रहा विचर्षणिः पवस्व सोम शं गवे ।

9.011.07c देवेभ्यो अनुकामकृत् ॥

9.011.08a इन्द्राय सोम पातवे मदाय परि षिच्यसे ।

9.011.08c मनश्चिन्मनसस्पतिः ॥

9.011.09a पवमान सुवीर्यं रयिं सोम रिरीहि नः ।

9.011.09c इन्दविन्द्रेण नो युजा ॥

9.012.01a सोमा असृग्रमिन्दवः सुता ऋतस्य सादने ।

9.012.01c इन्द्राय मधुमत्तमाः ॥

9.012.02a अभि विप्रा अनूषत गावो वत्सं न मातरः ।

9.012.02c इन्द्रं सोमस्य पीतये ॥

9.012.03a मदच्युत्क्षेति सादने सिन्धोरूर्मा विपश्चित् ।

9.012.03c सोमो गौरी अधि श्रितः ॥

9.012.04a दिवो नाभा विचक्षणोऽव्यो वारे महीयते ।

9.012.04c सोमो यः सुक्रतुः कविः ॥

9.012.05a यः सोमः कलशेष्वाँ अन्तः पवित्र आहितः ।

9.012.05c तमिन्दुः परि षस्वजे ॥

9.012.06a प्र वाचमिन्दुरिष्यति समुद्रस्याधि विष्टपि ।

9.012.06c जिन्वन्कोशं मधुश्चुतम् ॥

9.012.07a नित्यस्तोत्रो वनस्पतिर्धीनामन्तः सबर्दुघः ।

9.012.07c हिन्वानो मानुषा युगा ॥

9.012.08a अभि प्रिया दिवस्पदा सोमो हिन्वानो अर्षति ।

9.012.08c विप्रस्य धारया कविः ॥

9.012.09a आ पवमान धारय रयिं सहस्रवर्चसम् ।

9.012.09c अस्मे इन्दो स्वाभुवम् ॥

9.013.01a सोमः पुनानो अर्षति सहस्रधारो अत्यविः ।

9.013.01c वायोरिन्द्रस्य निष्कृतम् ॥

9.013.02a पवमानमवस्यवो विप्रमभि प्र गायत ।

9.013.02c सुष्वाणं देववीतये ॥

9.013.03a पवन्ते वाजसातये सोमाः सहस्रपाजसः ।

9.013.03c गृणाना देववीतये ॥

9.013.04a उत नो वाजसातये पवस्व बृहतीरिषः ।

9.013.04c द्युमदिन्दो सुवीर्यम् ॥

9.013.05a ते नः सहस्रिणं रयिं पवन्तामा सुवीर्यम् ।

9.013.05c सुवाना देवास इन्दवः ॥

9.013.06a अत्या हियाना न हेतृभिरसृग्रं वाजसातये ।

9.013.06c वि वारमव्यमाशवः ॥

9.013.07a वाश्रा अर्षन्तीन्दवोऽभि वत्सं न धेनवः ।

9.013.07c दधन्विरे गभस्त्योः ॥

9.013.08a जुष्ट इन्द्राय मत्सरः पवमान कनिक्रदत् ।

9.013.08c विश्वा अप द्विषो जहि ॥

9.013.09a अपघ्नन्तो अराव्णः पवमानाः स्वर्दृशः ।

9.013.09c योनावृतस्य सीदत ॥

9.014.01a परि प्रासिष्यदत्कविः सिन्धोरूर्मावधि श्रितः ।

9.014.01c कारं बिभ्रत्पुरुस्पृहम् ॥

9.014.02a गिरा यदी सबन्धवः पञ्च व्राता अपस्यवः ।

9.014.02c परिष्कृण्वन्ति धर्णसिम् ॥

9.014.03a आदस्य शुष्मिणो रसे विश्वे देवा अमत्सत ।

9.014.03c यदी गोभिर्वसायते ॥

9.014.04a निरिणानो वि धावति जहच्छर्याणि तान्वा ।

9.014.04c अत्रा सं जिघ्नते युजा ॥

9.014.05a नप्तीभिर्यो विवस्वतः शुभ्रो न मामृजे युवा ।

9.014.05c गाः कृण्वानो न निर्णिजम् ॥

9.014.06a अति श्रिती तिरश्चता गव्या जिगात्यण्व्या ।

9.014.06c वग्नुमियर्ति यं विदे ॥

9.014.07a अभि क्षिपः समग्मत मर्जयन्तीरिषस्पतिम् ।

9.014.07c पृष्ठा गृभ्णत वाजिनः ॥

9.014.08a परि दिव्यानि मर्मृशद्विश्वानि सोम पार्थिवा ।

9.014.08c वसूनि याह्यस्मयुः ॥

9.015.01a एष धिया यात्यण्व्या शूरो रथेभिराशुभिः ।

9.015.01c गच्छन्निन्द्रस्य निष्कृतम् ॥

9.015.02a एष पुरू धियायते बृहते देवतातये ।

9.015.02c यत्रामृतास आसते ॥

9.015.03a एष हितो वि नीयतेऽन्तः शुभ्रावता पथा ।

9.015.03c यदी तुञ्जन्ति भूर्णयः ॥

9.015.04a एष शृङ्गाणि दोधुवच्छिशीते यूथ्यो३ वृषा ।

9.015.04c नृम्णा दधान ओजसा ॥

9.015.05a एष रुक्मिभिरीयते वाजी शुभ्रेभिरंशुभिः ।

9.015.05c पतिः सिन्धूनां भवन् ॥

9.015.06a एष वसूनि पिब्दना परुषा ययिवाँ अति ।

9.015.06c अव शादेषु गच्छति ॥

9.015.07a एतं मृजन्ति मर्ज्यमुप द्रोणेष्वायवः ।

9.015.07c प्रचक्राणं महीरिषः ॥

9.015.08a एतमु त्यं दश क्षिपो मृजन्ति सप्त धीतयः ।

9.015.08c स्वायुधं मदिन्तमम् ॥

9.016.01a प्र ते सोतार ओण्यो३ रसं मदाय घृष्वये ।

9.016.01c सर्गो न तक्त्येतशः ॥

9.016.02a क्रत्वा दक्षस्य रथ्यमपो वसानमन्धसा ।

9.016.02c गोषामण्वेषु सश्चिम ॥

9.016.03a अनप्तमप्सु दुष्टरं सोमं पवित्र आ सृज ।

9.016.03c पुनीहीन्द्राय पातवे ॥

9.016.04a प्र पुनानस्य चेतसा सोमः पवित्रे अर्षति ।

9.016.04c क्रत्वा सधस्थमासदत् ॥

9.016.05a प्र त्वा नमोभिरिन्दव इन्द्र सोमा असृक्षत ।

9.016.05c महे भराय कारिणः ॥

9.016.06a पुनानो रूपे अव्यये विश्वा अर्षन्नभि श्रियः ।

9.016.06c शूरो न गोषु तिष्ठति ॥

9.016.07a दिवो न सानु पिप्युषी धारा सुतस्य वेधसः ।

9.016.07c वृथा पवित्रे अर्षति ॥

9.016.08a त्वं सोम विपश्चितं तना पुनान आयुषु ।

9.016.08c अव्यो वारं वि धावसि ॥

9.017.01a प्र निम्नेनेव सिन्धवो घ्नन्तो वृत्राणि भूर्णयः ।

9.017.01c सोमा असृग्रमाशवः ॥

9.017.02a अभि सुवानास इन्दवो वृष्टयः पृथिवीमिव ।

9.017.02c इन्द्रं सोमासो अक्षरन् ॥

9.017.03a अत्यूर्मिर्मत्सरो मदः सोमः पवित्रे अर्षति ।

9.017.03c विघ्नन्रक्षांसि देवयुः ॥

9.017.04a आ कलशेषु धावति पवित्रे परि षिच्यते ।

9.017.04c उक्थैर्यज्ञेषु वर्धते ॥

9.017.05a अति त्री सोम रोचना रोहन्न भ्राजसे दिवम् ।

9.017.05c इष्णन्सूर्यं न चोदयः ॥

9.017.06a अभि विप्रा अनूषत मूर्धन्यज्ञस्य कारवः ।

9.017.06c दधानाश्चक्षसि प्रियम् ॥

9.017.07a तमु त्वा वाजिनं नरो धीभिर्विप्रा अवस्यवः ।
9.017.07c मृजन्ति देवतातये ॥
9.017.08a मधोर्धारामनु क्षर तीव्रः सधस्थमासदः ।
9.017.08c चारुर्ऋताय पीतये ॥

9.018.01a परि सुवानो गिरिष्ठाः पवित्रे सोमो अक्षाः ।
9.018.01c मदेषु सर्वधा असि ॥
9.018.02a त्वं विप्रस्त्वं कविर्मधु प्र जातमन्धसः ।
9.018.02c मदेषु सर्वधा असि ॥
9.018.03a तव विश्वे सजोषसो देवासः पीतिमाशत ।
9.018.03c मदेषु सर्वधा असि ॥
9.018.04a आ यो विश्वानि वार्या वसूनि हस्तयोर्दधे ।
9.018.04c मदेषु सर्वधा असि ॥
9.018.05a य इमे रोदसी मही सं मातरेव दोहते ।
9.018.05c मदेषु सर्वधा असि ॥
9.018.06a परि यो रोदसी उभे सद्यो वाजेभिरर्षति ।
9.018.06c मदेषु सर्वधा असि ॥
9.018.07a स शुष्मी कलशेष्वा पुनानो अचिक्रदत् ।

9.018.07c मदेषु सर्वधा असि ॥

9.019.01a यत्सोम चित्रमुक्थ्यं दिव्यं पार्थिवं वसु ।

9.019.01c तन्नः पुनान आ भर ॥

9.019.02a युवं हि स्थः स्वर्पती इन्द्रश्च सोम गोपती ।

9.019.02c ईशाना पिप्यतं धियः ॥

9.019.03a वृषा पुनान आयुषु स्तनयन्नधि बर्हिषि ।

9.019.03c हरिः सन्योनिमासदत् ॥

9.019.04a अवावशन्त धीतयो वृषभस्याधि रेतसि ।

9.019.04c सूनोर्वत्सस्य मातरः ॥

9.019.05a कुविद्वृषण्यन्तीभ्यः पुनानो गर्भमादधत् ।

9.019.05c याः शुक्रं दुहते पयः ॥

9.019.06a उप शिक्षापतस्थुषो भियसमा धेहि शत्रुषु ।

9.019.06c पवमान विदा रयिम् ॥

9.019.07a नि शत्रोः सोम वृष्ण्यं नि शुष्मं नि वयस्तिर ।

9.019.07c दूरे वा सतो अन्ति वा ॥

9.020.01a प्र कविर्देववीतयेऽव्यो वारेभिरर्षति ।

9.020.01c साह्वान्विश्वा अभि स्पृधः ॥

9.020.02a स हि ष्मा जरितृभ्य आ वाजं गोमन्तमिन्वति ।

9.020.02c पवमानः सहस्रिणम् ॥

9.020.03a परि विश्वानि चेतसा मृशसे पवसे मती ।

9.020.03c स नः सोम श्रवो विदः ॥

9.020.04a अभ्यर्ष बृहद्यशो मघवद्भ्यो ध्रुवं रयिम् ।

9.020.04c इषं स्तोतृभ्य आ भर ॥

9.020.05a त्वं राजेव सुव्रतो गिरः सोमा विवेशिथ ।

9.020.05c पुनानो वह्ने अद्भुत ॥

9.020.06a स वह्निरप्सु दुष्टरो मृज्यमानो गभस्त्योः ।

9.020.06c सोमश्चमूषु सीदति ॥

9.020.07a क्रीळुर्मखो न मंहयुः पवित्रं सोम गच्छसि ।

9.020.07c दधत्स्तोत्रे सुवीर्यम् ॥

9.021.01a एते धावन्तीन्दवः सोमा इन्द्राय घृष्वयः ।

9.021.01c मत्सरासः स्वर्विदः ॥

9.021.02a प्रवृण्वन्तो अभियुजः सुष्वये वरिवोविदः ।

9.021.02c स्वयं स्तोत्रे वयस्कृतः ॥

9.021.03a वृथा क्रीळन्त इन्दवः सधस्थमभ्येकमित् ।

9.021.03c सिन्धोरूर्मा व्यक्षरन् ॥

9.021.04a एते विश्वानि वार्या पवमानास आशत ।

9.021.04c हिता न सप्तयो रथे ॥

9.021.05a आस्मिन्पिशङ्गमिन्दवो दधाता वेनमादिशे ।

9.021.05c यो अस्मभ्यमरावा ॥

9.021.06a ऋभुर्न रथ्यं नवं दधाता केतमादिशे ।

9.021.06c शुक्राः पवध्वमर्णसा ॥

9.021.07a एत उ त्ये अवीवशन्काष्ठां वाजिनो अक्रत ।

9.021.07c सतः प्रासाविषुर्मतिम् ॥

9.022.01a एते सोमास आशवो रथा इव प्र वाजिनः ।

9.022.01c सर्गाः सृष्टा अहेषत ॥

9.022.02a एते वाता इवोरवः पर्जन्यस्येव वृष्टयः ।

9.022.02c अग्नेरिव भ्रमा वृथा ॥

9.022.03a एते पूता विपश्चितः सोमासो दध्याशिरः ।

9.022.03c विपा व्यानशुर्धियः ॥

9.022.04a एते मृष्टा अमर्त्याः ससृवांसो न शश्रमुः ।

9.022.04c इयद्वन्तः पथो रजः ॥

9.022.05a एते पृष्ठानि रोदसोर्विप्रयन्तो व्यानशुः ।

9.022.05c उतेदमुत्तमं रजः ॥

9.022.06a तन्तुं तन्वानमुत्तममनु प्रवत आशत ।

9.022.06c उतेदमुत्तमाय्यम् ॥

9.022.07a त्वं सोम पणिभ्य आ वसु गव्यानि धारयः ।

9.022.07c ततं तन्तुमचिक्रदः ॥

9.023.01a सोमा असृग्रमाशवो मधोर्मदस्य धारया ।

9.023.01c अभि विश्वानि काव्या ॥

9.023.02a अनु प्रत्नास आयवः पदं नवीयो अक्रमुः ।

9.023.02c रुचे जनन्त सूर्यम् ॥

9.023.03a आ पवमान नो भरार्यो अदाशुषो गयम् ।

9.023.03c कृधि प्रजावतीरिषः ॥

9.023.04a अभि सोमास आयवः पवन्ते मद्यं मदम् ।

9.023.04c अभि कोशं मधुश्चुतम् ॥

9.023.05a सोमो अर्षति धर्णसिर्दधान इन्द्रियं रसम् ।

9.023.05c सुवीरो अभिशस्तिपाः ॥

9.023.06a इन्द्राय सोम पवसे देवेभ्यः सधमाद्यः ।

9.023.06c इन्दो वाजं सिषाससि ॥

9.023.07a अस्य पीत्वा मदानामिन्द्रो वृत्राण्यप्रति ।

9.023.07c जघान जघनच्च नु ॥

9.024.01a प्र सोमासो अधन्विषुः पवमानास इन्दवः ।

9.024.01c श्रीणाना अप्सु मृञ्जत ॥

9.024.02a अभि गावो अधन्विषुरापो न प्रवता यतीः ।

9.024.02c पुनाना इन्द्रमाशत ॥

9.024.03a प्र पवमान धन्वसि सोमेन्द्राय पातवे ।

9.024.03c नृभिर्यतो वि नीयसे ॥

9.024.04a त्वं सोम नृमादनः पवस्व चर्षणीसहे ।

9.024.04c सस्निर्यो अनुमाद्यः ॥

9.024.05a इन्दो यदद्रिभिः सुतः पवित्रं परिधावसि ।

9.024.05c अरमिन्द्रस्य धाम्ने ॥

9.024.06a पवस्व वृत्रहन्तमोक्थेभिरनुमाद्यः ।

9.024.06c शुचिः पावको अद्भुतः ॥

9.024.07a शुचिः पावक उच्यते सोमः सुतस्य मध्वः ।

9.024.07c देवावीरघशंसहा ॥

9.025.01a पवस्व दक्षसाधनो देवेभ्यः पीतये हरे ।

9.025.01c मरुद्भ्यो वायवे मदः ॥

9.025.02a पवमान धिया हितो३ऽभि योनिं कनिक्रदत् ।

9.025.02c धर्मणा वायुमा विश ॥

9.025.03a सं देवैः शोभते वृषा कविर्योनावधि प्रियः ।

9.025.03c वृत्रहा देववीतमः ॥

9.025.04a विश्वा रूपाण्याविशन्पुनानो याति हर्यतः ।

9.025.04c यत्रामृतास आसते ॥

9.025.05a अरुषो जनयन्गिरः सोमः पवत आयुषक् ।

9.025.05c इन्द्रं गच्छन्कविक्रतुः ॥

9.025.06a आ पवस्व मदिन्तम पवित्रं धारया कवे ।

9.025.06c अर्कस्य योनिमासदम् ॥

9.026.01a तममृक्षन्त वाजिनमुपस्थे अदितेरधि ।

9.026.01c विप्रासो अण्व्या धिया ॥

9.026.02a तं गावो अभ्यनूषत सहस्रधारमक्षितम् ।

9.026.02c इन्दुं धर्तारमा दिवः ॥

9.026.03a तं वेधां मेधयाह्यन्पवमानमधि द्यवि ।

9.026.03c धर्णसिं भूरिधायसम् ॥

9.026.04a तमह्यन्भुरिजोर्धिया संवसानं विवस्वतः ।

9.026.04c पतिं वाचो अदाभ्यम् ॥

9.026.05a तं सानावधि जामयो हरिं हिन्वन्त्यद्रिभिः ।

9.026.05c हर्यतं भूरिचक्षसम् ॥

9.026.06a तं त्वा हिन्वन्ति वेधसः पवमान गिरावृधम् ।

9.026.06c इन्दविन्द्राय मत्सरम् ॥

9.027.01a एष कविरभिष्टुतः पवित्रे अधि तोशते ।

9.027.01c पुनानो घ्नन्नप स्रिधः ॥

9.027.02a एष इन्द्राय वायवे स्वर्जित्परि षिच्यते ।

9.027.02c पवित्रे दक्षसाधनः ॥

9.027.03a एष नृभिर्वि नीयते दिवो मूर्धा वृषा सुतः ।

9.027.03c सोमो वनेषु विश्ववित् ॥

9.027.04a एष गव्युरचिक्रदत्पवमानो हिरण्ययुः ।

9.027.04c इन्दुः सत्राजिदस्तृतः ॥

9.027.05a ए॒ष सूर्ये॑ण हासते॒ पव॑मानो॒ अधि॒ द्यवि॑ ।

9.027.05c प॒वित्रे॑ मत्स॒रो मदः॑ ॥

9.027.06a ए॒ष शु॒ष्म्य॑सिष्यदद॒न्तरि॑क्षे॒ वृषा॒ हरिः॑ ।

9.027.06c पु॒ना॒न इन्दु॒रिन्द्र॒मा ॥

9.028.01a ए॒ष वा॒जी हि॒तो नृभि॑र्विश्व॒विन्मन॑स॒स्पतिः॑ ।

9.028.01c अव्यो॒ वारं॒ वि धा॑वति ॥

9.028.02a ए॒ष प॒वित्रे॑ अक्षर॒त्सोमो॑ दे॒वेभ्यः॑ सु॒तः ।

9.028.02c विश्वा॒ धामा॑न्या॒विशन् ॥

9.028.03a ए॒ष दे॒वः शु॑भायते॒ऽधि॒ योना॒वम॑र्त्यः ।

9.028.03c वृ॒त्र॒हा दे॑व॒वीत॑मः ॥

9.028.04a ए॒ष वृषा॒ कनि॑क्रदद्द॒शभि॑र्जा॒मिभि॑र्य॒तः ।

9.028.04c अ॒भि द्रोणा॑नि धावति ॥

9.028.05a ए॒ष सूर्य॑मरोचय॒त्पव॑मानो॒ विच॑र्षणिः ।

9.028.05c विश्वा॒ धामा॑नि विश्व॒वित् ॥

9.028.06a ए॒ष शु॒ष्म्यदा॑भ्यः॒ सोमः॑ पुना॒नो अ॑र्षति ।

9.028.06c दे॒वा॒वीर॑घशंस॒हा ॥

9.029.01a प्रास्य धारा अक्षरन्वृष्णः सुतस्यौजसा ।

9.029.01c देवाँ अनु प्रभूषतः ॥

9.029.02a सप्तिं मृजन्ति वेधसो गृणन्तः कारवो गिरा ।

9.029.02c ज्योतिर्जज्ञानमुक्थ्यम् ॥

9.029.03a सुषहा सोम तानि ते पुनानाय प्रभूवसो ।

9.029.03c वर्धा समुद्रमुक्थ्यम् ॥

9.029.04a विश्वा वसूनि संजयन्पवस्व सोम धारया ।

9.029.04c इनु द्वेषांसि सध्र्यक् ॥

9.029.05a रक्षा सु नो अररुषः स्वनात्समस्य कस्य चित् ।

9.029.05c निदो यत्र मुमुच्महे ॥

9.029.06a एन्दो पार्थिवं रयिं दिव्यं पवस्व धारया ।

9.029.06c द्युमन्तं शुष्ममा भर ॥

9.030.01a प्र धारा अस्य शुष्मिणो वृथा पवित्रे अक्षरन् ।

9.030.01c पुनानो वाचमिष्यति ॥

9.030.02a इन्दुर्हियानः सोतृभिर्मृज्यमानः कनिक्रदत् ।

9.030.02c इयर्ति वग्नुमिन्द्रियम् ॥

9.030.03a आ नः शुष्मं नृषाह्यं वीरवन्तं पुरुस्पृहम् ।

9.030.03c पवस्व सोम धारया ॥

9.030.04a प्र सोमो अति धारया पवमानो असिष्यदत् ।

9.030.04c अभि द्रोणान्यासदम् ॥

9.030.05a अप्सु त्वा मधुमत्तमं हरिं हिन्वन्त्यद्रिभिः ।

9.030.05c इन्दविन्द्राय पीतये ॥

9.030.06a सुनोता मधुमत्तमं सोममिन्द्राय वज्रिणे ।

9.030.06c चारुं शर्धाय मत्सरम् ॥

9.031.01a प्र सोमासः स्वाध्य१ः पवमानासो अक्रमुः ।

9.031.01c रयिं कृण्वन्ति चेतनम् ॥

9.031.02a दिवस्पृथिव्या अधि भवेन्दो द्युम्नवर्धनः ।

9.031.02c भवा वाजानां पतिः ॥

9.031.03a तुभ्यं वाता अभिप्रियस्तुभ्यमर्षन्ति सिन्धवः ।

9.031.03c सोम वर्धन्ति ते महः ॥

9.031.04a आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् ।

9.031.04c भवा वाजस्य संगथे ॥

9.031.05a तुभ्यं गावो घृतं पयो बभ्रो दुदुह्रे अक्षितम् ।

9.031.05c वर्षिष्ठे अधि सानवि ॥

9.031.06a स्वायुधस्य ते सतो भुवनस्य पते वयम् ।

9.031.06c इन्दो सखित्वमुश्मसि ॥

9.032.01a प्र सोमासो मदच्युतः श्रवसे नो मघोनः ।

9.032.01c सुता विदथे अक्रमुः ॥

9.032.02a आदीं त्रितस्य योषणो हरिं हिन्वन्त्यद्रिभिः ।

9.032.02c इन्दुमिन्द्राय पीतये ॥

9.032.03a आदीं हंसो यथा गणं विश्वस्यावीवशन्मतिम् ।

9.032.03c अत्यो न गोभिरज्यते ॥

9.032.04a उभे सोमावचाकशन्मृगो न तक्तो अर्षसि ।

9.032.04c सीदन्नृतस्य योनिमा ॥

9.032.05a अभि गावो अनूषत योषा जारमिव प्रियम् ।

9.032.05c अगन्नाजिं यथा हितम् ॥

9.032.06a अस्मे धेहि द्युमद्यशो मघवद्भ्यश्च मह्यं च ।

9.032.06c सनिं मेधामुत श्रवः ॥

9.033.01a प्र सोमासो विपश्चितोऽपां न यन्त्यूर्मयः ।

9.033.01c वनानि महिषा इव ॥

9.033.02a अभि द्रोणानि बभ्रवः शुक्रा ऋतस्य धारया ।

9.033.02c वाजं गोमन्तमक्षरन् ॥

9.033.03a सुता इन्द्राय वायवे वरुणाय मरुद्भ्यः ।

9.033.03c सोमा अर्षन्ति विष्णवे ॥

9.033.04a तिस्रो वाच उदीरते गावो मिमन्ति धेनवः ।

9.033.04c हरिरेति कनिक्रदत् ॥

9.033.05a अभि ब्रह्मीरनूषत यह्वीरृतस्य मातरः ।

9.033.05c मर्मृज्यन्ते दिवः शिशुम् ॥

9.033.06a रायः समुद्राँश्चतुरोऽस्मभ्यं सोम विश्वतः ।

9.033.06c आ पवस्व सहस्रिणः ॥

9.034.01a प्र सुवानो धारया तनेन्दुर्हिन्वानो अर्षति ।

9.034.01c रुजद्दृळ्हा व्योजसा ॥

9.034.02a सुत इन्द्राय वायवे वरुणाय मरुद्भ्यः ।

9.034.02c सोमो अर्षति विष्णवे ॥

9.034.03a वृषाणं वृषभिर्यतं सुन्वन्ति सोममद्रिभिः ।

9.034.03c दुहन्ति शक्मना पयः ॥

9.034.04a भुवत्त्रितस्य मर्ज्यो भुवदिन्द्राय मत्सरः ।

9.034.04c सं रूपैरज्यते हरिः ॥

9.034.05a अभीमृतस्य विष्टपं दुहते पृश्निमातरः ।

9.034.05c चारु प्रियतमं हविः ॥

9.034.06a समेनमह्रुता इमा गिरो अर्षन्ति सस्रुतः ।

9.034.06c धेनूर्वाश्रो अवीवशत् ॥

9.035.01a आ नः पवस्व धारया पवमान रयिं पृथुम् ।

9.035.01c यया ज्योतिर्विदासि नः ॥

9.035.02a इन्दो समुद्रमीङ्खय पवस्व विश्वमेजय ।

9.035.02c रायो धर्ता न ओजसा ॥

9.035.03a त्वया वीरेण वीरवोऽभि ष्याम पृतन्यतः ।

9.035.03c क्षरा णो अभि वार्यम् ॥

9.035.04a प्र वाजमिन्दुरिष्यति सिषासन्वाजसा ऋषिः ।

9.035.04c व्रता विदान आयुधा ॥

9.035.05a तं गीर्भिर्वाचमीङ्खयं पुनानं वासयामसि ।

9.035.05c सोमं जनस्य गोपतिम् ॥

9.035.06a विश्वो यस्य व्रते जनो दाधार धर्मणस्पतेः ।

9.035.06c पुनानस्य प्रभूवसोः ॥

9.036.01a असर्जि रथ्यो यथा पवित्रे चम्वोः सुतः ।

9.036.01c कार्ष्मन्वाजी न्यक्रमीत् ॥

9.036.02a स वह्निः सोम जागृविः पवस्व देववीरति ।

9.036.02c अभि कोशं मधुश्चुतम् ॥

9.036.03a स नो ज्योतींषि पूर्व्य पवमान वि रोचय ।

9.036.03c क्रत्वे दक्षाय नो हिनु ॥

9.036.04a शुम्भमान ऋतायुभिर्मृज्यमानो गभस्त्योः ।

9.036.04c पवते वारे अव्यये ॥

9.036.05a स विश्वा दाशुषे वसु सोमो दिव्यानि पार्थिवा ।

9.036.05c पवतामान्तरिक्ष्या ॥

9.036.06a आ दिवस्पृष्ठमश्वयुर्गव्ययुः सोम रोहसि ।

9.036.06c वीरयुः शवसस्पते ॥

9.037.01a स सुतः पीतये वृषा सोमः पवित्रे अर्षति ।

9.037.01c विघ्नन्रक्षांसि देवयुः ॥

9.037.02a स पवित्रे विचक्षणो हरिरर्षति धर्णसिः ।

9.037.02c अभि योनिं कनिक्रदत् ॥

9.037.03a स वाजी रोचना दिवः पवमानो वि धावति ।

9.037.03c रक्षोहा वारमव्ययम् ॥

9.037.04a स त्रितस्याधि सानवि पवमानो अरोचयत् ।

9.037.04c जामिभिः सूर्यं सह ॥

9.037.05a स वृत्रहा वृषा सुतो वरिवोविददाभ्यः ।

9.037.05c सोमो वाजमिवासरत् ॥

9.037.06a स देवः कविनेषितो३ऽभि द्रोणानि धावति ।

9.037.06c इन्दुरिन्द्राय मंहना ॥

9.038.01a एष उ स्य वृषा रथोऽव्यो वारेभिरर्षति ।

9.038.01c गच्छन्वाजं सहस्रिणम् ॥

9.038.02a एतं त्रितस्य योषणो हरिं हिन्वन्त्यद्रिभिः ।

9.038.02c इन्दुमिन्द्राय पीतये ॥

9.038.03a एतं त्यं हरितो दश मर्मृज्यन्ते अपस्युवः ।

9.038.03c याभिर्मदाय शुम्भते ॥

9.038.04a एष स्य मानुषीष्वा श्येनो न विक्षु सीदति ।

9.038.04c गच्छञ्जारो न योषितम् ॥

9.038.05a एष स्य मद्यो रसोऽव चष्टे दिवः शिशुः ।

9.038.05c य इन्दुर्वारमाविशत् ॥

9.038.06a एष स्य पीतये सुतो हरिरर्षति धर्णसिः ।

9.038.06c क्रन्दन्योनिमभि प्रियम् ॥

9.039.01a आशुरर्ष बृहन्मते परि प्रियेण धाम्ना ।

9.039.01c यत्र देवा इति ब्रवन् ॥

9.039.02a परिष्कृण्वन्ननिष्कृतं जनाय यातयन्निषः ।

9.039.02c वृष्टिं दिवः परि स्रव ॥

9.039.03a सुत एति पवित्र आ त्विषिं दधान ओजसा ।

9.039.03c विचक्षाणो विरोचयन् ॥

9.039.04a अयं स यो दिवस्परि रघुयामा पवित्र आ ।

9.039.04c सिन्धोरूर्मा व्यक्षरत् ॥

9.039.05a आविवासन्परावतो अथो अर्वावतः सुतः ।

9.039.05c इन्द्राय सिच्यते मधु ॥

9.039.06a समीचीना अनूषत हरिं हिन्वन्त्यद्रिभिः ।

9.039.06c योनावृतस्य सीदत ॥

9.040.01a पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः ।

9.040.01c शुम्भन्ति विप्रं धीतिभिः ॥

9.040.02a आ योनिमरुणो रुहद्गमदिन्द्रं वृषा सुतः ।

9.040.02c ध्रुवे सदसि सीदति ॥

9.040.03a नू नो रयिं महामिन्दोऽस्मभ्यं सोम विश्वतः ।

9.040.03c आ पवस्व सहस्रिणम् ॥

9.040.04a विश्वा सोम पवमान द्युम्नानीन्दवा भर ।

9.040.04c विदाः सहस्रिणीरिषः ॥

9.040.05a स नः पुनान आ भर रयिं स्तोत्रे सुवीर्यम् ।

9.040.05c जरितुर्वर्धया गिरः ॥

9.040.06a पुनान इन्दवा भर सोम द्विबर्हसं रयिम् ।

9.040.06c वृषन्निन्दो न उक्थ्यम् ॥

9.041.01a प्र ये गावो न भूर्णयस्त्वेषा अयासो अक्रमुः ।

9.041.01c घ्नन्तः कृष्णामप त्वचम् ॥

9.041.02a सुवितस्य मनामहेऽति सेतुं दुराव्यम् ।

9.041.02c साह्वांसो दस्युमव्रतम् ॥

9.041.03a शृण्वे वृष्टेरिव स्वनः पवमानस्य शुष्मिणः ।

9.041.03c चरन्ति विद्युतो दिवि ॥

9.041.04a आ पवस्व महीमिषं गोमदिन्दो हिरण्यवत् ।

9.041.04c अश्वावद्वाजवत्सुतः ॥

9.041.05a स पवस्व विचर्षण आ मही रोदसी पृण ।

9.041.05c उषाः सूर्यो न रश्मिभिः ॥

9.041.06a परि णः शर्मयन्त्या धारया सोम विश्वतः ।

9.041.06c सरा रसेव विष्टपम् ॥

9.042.01a जनयन्रोचना दिवो जनयन्नप्सु सूर्यम् ।

9.042.01c वसानो गा अपो हरिः ॥

9.042.02a एष प्रत्नेन मन्मना देवो देवेभ्यस्परि ।

9.042.02c धारया पवते सुतः ॥

9.042.03a वावृधानाय तूर्वये पवन्ते वाजसातये ।

9.042.03c सोमाः सहस्रपाजसः ॥

9.042.04a दुहानः प्रत्नमित्पयः पवित्रे परि षिच्यते ।

9.042.04c क्रन्दन्देवाँ अजीजनत् ॥

9.042.05a अभि विश्वानि वार्याभि देवाँ ऋतावृधः ।

9.042.05c सोमः पुनानो अर्षति ॥

9.042.06a गोमन्नः सोम वीरवदश्वावद्वाजवत्सुतः ।

9.042.06c पवस्व बृहतीरिषः ॥

9.043.01a यो अत्य इव मृज्यते गोभिर्मदाय हर्यतः ।

9.043.01c तं गीर्भिर्वासयामसि ॥

9.043.02a तं नो विश्वा अवस्युवो गिरः शुम्भन्ति पूर्वथा ।

9.043.02c इन्दुमिन्द्राय पीतये ॥

9.043.03a पुनानो याति हर्यतः सोमो गीर्भिः परिष्कृतः ।

9.043.03c विप्रस्य मेध्यातिथेः ॥

9.043.04a पवमान विदा रयिमस्मभ्यं सोम सुश्रियम् ।

9.043.04c इन्दो सहस्रवर्चसम् ॥

9.043.05a इन्दुरत्यो न वाजसृत्कनिक्रन्ति पवित्र आ ।

9.043.05c यदक्षारति देवयुः ॥

9.043.06a पवस्व वाजसातये विप्रस्य गृणतो वृधे ।

9.043.06c सोम रास्व सुवीर्यम् ॥

9.044.01a प्र ण इन्दो महे तन ऊर्मिं न बिभ्रदर्षसि ।

9.044.01c अभि देवाँ अयास्यः ॥

9.044.02a मती जुष्टो धिया हितः सोमो हिन्वे परावति ।

9.044.02c विप्रस्य धारया कविः ॥

9.044.03a अयं देवेषु जागृविः सुत एति पवित्र आ ।

9.044.03c सोमो याति विचर्षणिः ॥

9.044.04a स नः पवस्व वाजयुश्चक्राणश्चारुमध्वरम् ।

9.044.04c बर्हिष्माँ आ विवासति ॥

9.044.05a स नो भगाय वायवे विप्रवीरः सदावृधः ।

9.044.05c सोमो देवेष्वा यमत् ॥

9.044.06a स नो अद्य वसुत्तये क्रतुविद्गातुवित्तमः ।

9.044.06c वाजं जेषि श्रवो बृहत् ॥

9.045.01a स पवस्व मदाय कं नृचक्षा देववीतये ।

9.045.01c इन्दविन्द्राय पीतये ॥

9.045.02a स नो अर्षाभि दूत्यं१ त्वमिन्द्राय तोशसे ।

9.045.02c देवान्सखिभ्य आ वरम् ॥

9.045.03a उत त्वामरुणं वयं गोभिरञ्ज्मो मदाय कम् ।

9.045.03c वि नो राये दुरो वृधि ॥

9.045.04a अत्यू पवित्रमक्रमीद्वाजी धुरं न यामनि ।

9.045.04c इन्दुर्देवेषु पत्यते ॥

9.045.05a समी सखायो अस्वरन्वने क्रीळन्तमत्यविम् ।

9.045.05c इन्दुं नावा अनूषत ॥

9.045.06a तया पवस्व धारया यया पीतो विचक्षसे ।

9.045.06c इन्दो स्तोत्रे सुवीर्यम् ॥

9.046.01a असृग्रन्देववीतयेऽत्यासः कृत्व्या इव ।

9.046.01c क्षरन्तः पर्वतावृधः ॥

9.046.02a परिष्कृतास इन्दवो योषेव पित्र्यावती ।

9.046.02c वायुं सोमा असृक्षत ॥

9.046.03a एते सोमास इन्दवः प्रयस्वन्तश्चमू सुताः ।

9.046.03c इन्द्रं वर्धन्ति कर्मभिः ॥

9.046.04a आ धावता सुहस्त्यः शुक्रा गृभ्णीत मन्थिना ।

9.046.04c गोभिः श्रीणीत मत्सरम् ॥

9.046.05a स पवस्व धनंजय प्रयन्ता राधसो महः ।

9.046.05c अस्मभ्यं सोम गातुवित् ॥

9.046.06a एतं मृजन्ति मर्ज्यं पवमानं दश क्षिपः ।

9.046.06c इन्द्राय मत्सरं मदम् ॥

9.047.01a अया सोमः सुकृत्यया महश्चिदभ्यवर्धत ।

9.047.01c मन्दान उद्वृषायते ॥

9.047.02a कृतानीदस्य कर्त्वा चेतन्ते दस्युतर्हणा ।

9.047.02c ऋणा च धृष्णुश्चयते ॥

9.047.03a आत्सोम इन्द्रियो रसो वज्रः सहस्रसा भुवत् ।

9.047.03c उक्थं यदस्य जायते ॥

9.047.04a स्वयं कविर्विधर्तरि विप्राय रत्नमिच्छति ।

9.047.04c यदी मर्मृज्यते धियः ॥

9.047.05a सिषासतू रयीणां वाजेष्वर्वतामिव ।

9.047.05c भरेषु जिग्युषामसि ॥

9.048.01a तं त्वा नृम्णानि बिभ्रतं सधस्थेषु महो दिवः ।

9.048.01c चारुं सुकृत्ययेमहे ॥

9.048.02a संवृक्तधृष्णुमुक्थ्यं महामहिव्रतं मदम् ।

9.048.02c शतं पुरो रुरुक्षणिम् ॥

9.048.03a अतस्त्वा रयिमभि राजानं सुक्रतो दिवः ।

9.048.03c सुपर्णो अव्यथिर्भरत् ॥

9.048.04a विश्वस्मा इत्स्वर्दृशे साधारणं रजस्तुरम् ।

9.048.04c गोपामृतस्य विभरत् ॥

9.048.05a अधा हिन्वान इन्द्रियं ज्यायो महित्वमानशे ।

9.048.05c अभिष्टिकृद्विचर्षणिः ॥

9.049.01a पवस्व वृष्टिमा सु नोऽपामूर्मिं दिवस्परि ।

9.049.01c अयक्ष्मा बृहतीरिषः ॥

9.049.02a तया पवस्व धारया यया गाव इहागमन् ।

9.049.02c जन्यास उप नो गृहम् ॥

9.049.03a घृतं पवस्व धारया यज्ञेषु देववीतमः ।

9.049.03c अस्मभ्यं वृष्टिमा पव ॥

9.049.04a स न ऊर्जे व्यश्व्ययं पवित्रं धाव धारया ।

9.049.04c देवासः शृणवन्हि कम् ॥

9.049.05a पवमानो असिष्यदद्रक्षांस्यपजङ्घनत् ।

9.049.05c प्रत्नवद्रोचयन्रुचः ॥

9.050.01a उत्ते शुष्मास ईरते सिन्धोरूर्मेरिव स्वनः ।

9.050.01c वाणस्य चोदया पविम् ॥

9.050.02a प्रसवे त उदीरते तिस्रो वाचो मखस्युवः ।

9.050.02c यदव्य एषि सानवि ॥

9.050.03a अव्यो वारे परि प्रियं हरिं हिन्वन्त्यद्रिभिः ।

9.050.03c पवमानं मधुश्चुतम् ॥

9.050.04a आ पवस्व मदिन्तम पवित्रं धारया कवे ।

9.050.04c अर्कस्य योनिमासदम् ॥

9.050.05a स पवस्व मदिन्तम गोभिरञ्जानो अक्तुभिः ।

9.050.05c इन्दविन्द्राय पीतये ॥

9.051.01a अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आ सृज ।

9.051.01c पुनीहीन्द्राय पातवे ॥

9.051.02a दिवः पीयूषमुत्तमं सोममिन्द्राय वज्रिणे ।

9.051.02c सुनोता मधुमत्तमम् ॥

9.051.03a तव त्य इन्दो अन्धसो देवा मधोर्व्यश्नते ।

9.051.03c पवमानस्य मरुतः ॥

9.051.04a त्वं हि सोम वर्धयन्सुतो मदाय भूर्णये ।

9.051.04c वृषन्स्तोतारमूतये ॥

9.051.05a अभ्यर्ष विचक्षण पवित्रं धारया सुतः ।

9.051.05c अभि वाजमुत श्रवः ॥

9.052.01a परि द्युक्षः सनद्रयिर्भरद्वाजं नो अन्धसा ।

9.052.01c सुवानो अर्ष पवित्र आ ॥

9.052.02a तव प्रत्नेभिरध्वभिरव्यो वारे परि प्रियः ।

9.052.02c सहस्रधारो यात्तना ॥

9.052.03a चरुर्न यस्तमीङ्खयेन्दो न दानमीङ्खय ।

9.052.03c वधैर्वधस्नवीङ्खय ॥

9.052.04a नि शुष्ममिन्दवेषां पुरुहूत जनानाम् ।

9.052.04c यो अस्माँ आदिदेशति ॥

9.052.05a शतं न इन्द ऊतिभिः सहस्रं वा शुचीनाम् ।

9.052.05c पवस्व मंहयद्रयिः ॥

9.053.01a उत्ते शुष्मासो अस्थू रक्षो भिन्दन्तो अद्रिवः ।

9.053.01c नुदस्व याः परिस्पृधः ॥

9.053.02a अया निजघ्निरोजसा रथसंगे धने हिते ।

9.053.02c स्तवा अबिभ्युषा हृदा ॥

9.053.03a अस्य व्रतानि नाधृषे पवमानस्य दूढ्या ।

9.053.03c रुज यस्त्वा पृतन्यति ॥

9.053.04a तं हिन्वन्ति मदच्युतं हरिं नदीषु वाजिनम् ।

9.053.04c इन्दुमिन्द्राय मत्सरम् ॥

9.054.01a अस्य प्रत्नामनु द्युतं शुक्रं दुदुह्रे अह्रयः ।

9.054.01c पयः सहस्रसामृषिम् ॥

9.054.02a अयं सूर्य इवोपदृगयं सरांसि धावति ।

9.054.02c सप्त प्रवत आ दिवम् ॥

9.054.03a अयं विश्वानि तिष्ठति पुनानो भुवनोपरि ।

9.054.03c सोमो देवो न सूर्यः ॥

9.054.04a परि णो देववीतये वाजाँ अर्षसि गोमतः ।

9.054.04c पुनान इन्दविन्द्रयुः ॥

9.055.01a यवंयवं नो अन्धसा पुष्टम्पुष्टं परि स्रव ।

9.055.01c सोम विश्वा च सौभगा ॥

9.055.02a इन्दो यथा तव स्तवो यथा ते जातमन्धसः ।

9.055.02c नि बर्हिषि प्रिये सदः ॥

9.055.03a उत नो गोविदश्ववित्पवस्व सोमान्धसा ।

9.055.03c मक्षूतमेभिरहभिः ॥

9.055.04a यो जिनाति न जीयते हन्ति शत्रुमभीत्य ।
9.055.04c स पवस्व सहस्रजित् ॥

9.056.01a परि सोम ऋतं बृहदाशुः पवित्रे अर्षति ।
9.056.01c विघ्नन्रक्षांसि देवयुः ॥
9.056.02a यत्सोमो वाजमर्षति शतं धारा अपस्युवः ।
9.056.02c इन्द्रस्य सख्यमाविशन् ॥
9.056.03a अभि त्वा योषणो दश जारं न कन्यानूषत ।
9.056.03c मृज्यसे सोम सातये ॥
9.056.04a त्वमिन्द्राय विष्णवे स्वादुरिन्दो परि स्रव ।
9.056.04c नॄन्स्तोतॄन्पाह्यंहसः ॥

9.057.01a प्र ते धारा असश्चतो दिवो न यन्ति वृष्टयः ।
9.057.01c अच्छा वाजं सहस्रिणम् ॥
9.057.02a अभि प्रियाणि काव्या विश्वा चक्षाणो अर्षति ।
9.057.02c हरिस्तुञ्जान आयुधा ॥
9.057.03a स मर्मृजान आयुभिरिभो राजेव सुव्रतः ।
9.057.03c श्येनो न वंसु षीदति ॥

9.057.04a स नो विश्वा दिवो वसूतो पृथिव्या अधि ।

9.057.04c पुनान इन्दवा भर ॥

9.058.01a तरत्स मन्दी धावति धारा सुतस्यान्धसः ।

9.058.01c तरत्स मन्दी धावति ॥

9.058.02a उस्रा वेद वसूनां मर्तस्य देव्यवसः ।

9.058.02c तरत्स मन्दी धावति ॥

9.058.03a ध्वस्रयोः पुरुषन्त्योरा सहस्राणि दद्महे ।

9.058.03c तरत्स मन्दी धावति ॥

9.058.04a आ ययोस्त्रिंशतं तना सहस्राणि च दद्महे ।

9.058.04c तरत्स मन्दी धावति ॥

9.059.01a पवस्व गोजिदश्वजिद्विश्वजित्सोम रण्यजित् ।

9.059.01c प्रजावद्रत्नमा भर ॥

9.059.02a पवस्वाद्भ्यो अदाभ्यः पवस्वौषधीभ्यः ।

9.059.02c पवस्व धिषणाभ्यः ॥

9.059.03a त्वं सोम पवमानो विश्वानि दुरिता तर ।

9.059.03c कविः सीद नि बर्हिषि ॥

9.059.04a पवमान स्वर्विदो जायमानोऽभवो महान् ।

9.059.04c इन्दो विश्वाँ अभीदसि ॥

9.060.01a प्र गायत्रेण गायत पवमानं विचर्षणिम् ।

9.060.01c इन्दुं सहस्रचक्षसम् ॥

9.060.02a तं त्वा सहस्रचक्षसमथो सहस्रभर्णसम् ।

9.060.02c अति वारमपाविषुः ॥

9.060.03a अति वारान्पवमानो असिष्यदत्कलशाँ अभि धावति ।

9.060.03c इन्द्रस्य हार्द्याविशन् ॥

9.060.04a इन्द्रस्य सोम राधसे शं पवस्व विचर्षणे ।

9.060.04c प्रजावद्रेत आ भर ॥

9.061.01a अया वीती परि स्रव यस्त इन्दो मदेष्वा ।

9.061.01c अवाहन्नवतीर्नव ॥

9.061.02a पुरः सद्य इत्थाधिये दिवोदासाय शम्बरम् ।

9.061.02c अध त्यं तुर्वशं यदुम् ॥

9.061.03a परि णो अश्वमश्वविद्गोमदिन्दो हिरण्यवत् ।

9.061.03c क्षरा सहस्रिणीरिषः ॥

9.061.04a पवमानस्य ते वयं पवित्रमभ्युन्दतः ।

9.061.04c सखित्वमा वृणीमहे ॥

9.061.05a ये ते पवित्रमूर्मयोऽभिक्षरन्ति धारया ।

9.061.05c तेभिर्नः सोम मृळय ॥

9.061.06a स नः पुनान आ भर रयिं वीरवतीमिषम् ।

9.061.06c ईशानः सोम विश्वतः ॥

9.061.07a एतमु त्यं दश क्षिपो मृजन्ति सिन्धुमातरम् ।

9.061.07c समादित्येभिरख्यत ॥

9.061.08a समिन्द्रेणोत वायुना सुत एति पवित्र आ ।

9.061.08c सं सूर्यस्य रश्मिभिः ॥

9.061.09a स नो भगाय वायवे पूष्णे पवस्व मधुमान् ।

9.061.09c चारुर्मित्रे वरुणे च ॥

9.061.10a उच्चा ते जातमन्धसो दिवि षद्भूम्या ददे ।

9.061.10c उग्रं शर्म महि श्रवः ॥

9.061.11a एना विश्वान्यर्य आ द्युम्नानि मानुषाणाम् ।

9.061.11c सिषासन्तो वनामहे ॥

9.061.12a स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः ।

9.061.12c वरिवोवित्परि स्रव ॥

9.061.13a उपो षु जातमप्तुरं गोभिर्भङ्गं परिष्कृतम् ।

9.061.13c इन्दुं देवा अयासिषुः ॥

9.061.14a तमिद्वर्धन्तु नो गिरो वत्सं संशिश्वरीरिव ।

9.061.14c य इन्द्रस्य हृदंसनिः ॥

9.061.15a अर्षा णः सोम शं गवे धुक्षस्व पिप्युषीमिषम् ।

9.061.15c वर्धा समुद्रमुक्थ्यम् ॥

9.061.16a पवमानो अजीजनद्दिवश्चित्रं न तन्यतुम् ।

9.061.16c ज्योतिर्वैश्वानरं बृहत् ॥

9.061.17a पवमानस्य ते रसो मदो राजन्नदुच्छुनः ।

9.061.17c वि वारमव्यमर्षति ॥

9.061.18a पवमान रसस्तव दक्षो वि राजति द्युमान् ।

9.061.18c ज्योतिर्विश्वं स्वर्दृशे ॥

9.061.19a यस्ते मदो वरेण्यस्तेना पवस्वान्धसा ।

9.061.19c देवावीरघशंसहा ॥

9.061.20a जघ्निर्वृत्रममित्रियं सस्निर्वाजं दिवेदिवे ।

9.061.20c गोषा उ अश्वसा असि ॥

9.061.21a सम्मिश्लो अरुषो भव सूपस्थाभिर्न धेनुभिः ।

9.061.21c सीदञ्छ्येनो न योनिमा ॥

9.061.22a स पवस्व य आविथेन्द्रं वृत्राय हन्तवे ।

9.061.22c वव्रिवांसं महीरपः ॥

9.061.23a सुवीरासो वयं धना जयेम सोम मीढ्वः ।

9.061.23c पुनानो वर्ध नो गिरः ॥

9.061.24a त्वोतासस्तवावसा स्याम वन्वन्त आमुरः ।

9.061.24c सोम व्रतेषु जागृहि ॥

9.061.25a अपघ्नन्पवते मृधोऽप सोमो अराव्णः ।

9.061.25c गच्छन्निन्द्रस्य निष्कृतम् ॥

9.061.26a महो नो राय आ भर पवमान जही मृधः ।

9.061.26c रास्वेन्दो वीरवद्यशः ॥

9.061.27a न त्वा शतं चन ह्रुतो राधो दित्सन्तमा मिनन् ।

9.061.27c यत्पुनानो मखस्यसे ॥

9.061.28a पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने ।

9.061.28c विश्वा अप द्विषो जहि ॥

9.061.29a अस्य ते सख्ये वयं तवेन्दो द्युम्न उत्तमे ।

9.061.29c सासह्याम पृतन्यतः ॥

9.061.30a या ते भीमान्यायुधा तिग्मानि सन्ति धूर्वणे ।

9.061.30c रक्षा समस्य नो निदः ॥

9.062.01a एते असृग्रमिन्दवस्तिरः पवित्रमाशवः ।

9.062.01c विश्वान्यभि सौभगा ॥

9.062.02a विघ्नन्तो दुरिता पुरु सुगा तोकाय वाजिनः ।

9.062.02c तना कृण्वन्तो अर्वते ॥

9.062.03a कृण्वन्तो वरिवो गवेऽभ्यर्षन्ति सुष्टुतिम् ।

9.062.03c इळामस्मभ्यं संयतम् ॥

9.062.04a असाव्यंशुर्मदायाप्सु दक्षो गिरिष्ठाः ।

9.062.04c श्येनो न योनिमासदत् ॥

9.062.05a शुभ्रमन्धो देववातमप्सु धूतो नृभिः सुतः ।

9.062.05c स्वदन्ति गावः पयोभिः ॥

9.062.06a आदीमश्वं न हेतारोऽशूशुभन्नमृताय ।

9.062.06c मध्वो रसं सधमादे ॥

9.062.07a यास्ते धारा मधुश्चुतोऽसृग्रमिन्द ऊतये ।

9.062.07c ताभिः पवित्रमासदः ॥

9.062.08a सो अर्षेन्द्राय पीतये तिरो रोमाण्यव्यया ।

9.062.08c सीदन्योना वनेष्वा ॥

9.062.09a त्वमिन्दो परि स्रव स्वादिष्ठो अङ्गिरोभ्यः ।

9.062.09c वरिवोविद्धृतं पयः ॥

9.062.10a अयं विचर्षणिर्हितः पवमानः स चेतति ।

9.062.10c हिन्वान आप्यं बृहत् ॥

9.062.11a एष वृषा वृषव्रतः पवमानो अशस्तिहा ।

9.062.11c करद्वसूनि दाशुषे ॥

9.062.12a आ पवस्व सहस्रिणं रयिं गोमन्तमश्विनम् ।

9.062.12c पुरुश्चन्द्रं पुरुस्पृहम् ॥

9.062.13a एष स्य परि षिच्यते मर्मृज्यमान आयुभिः ।

9.062.13c उरुगायः कविक्रतुः ॥

9.062.14a सहस्रोतिः शतामघो विमानो रजसः कविः ।

9.062.14c इन्द्राय पवते मदः ॥

9.062.15a गिरा जात इह स्तुत इन्दुरिन्द्राय धीयते ।

9.062.15c विर्योना वसताविव ॥

9.062.16a पवमानः सुतो नृभिः सोमो वाजमिवासरत् ।

9.062.16c चमूषु शक्मनासदम् ॥

9.062.17a तं त्रिपृष्ठे त्रिवन्धुरे रथे युञ्जन्ति यातवे ।

9.062.17c ऋषीणां सप्त धीतिभिः ॥

9.062.18a तं सोतारो धनस्पृतमाशुं वाजाय यातवे ।

9.062.18c हरिं हिनोत वाजिनम् ॥

9.062.19a आविशन्कलशं सुतो विश्वा अर्षन्नभि श्रियः ।

9.062.19c शूरो न गोषु तिष्ठति ॥

9.062.20a आ त इन्दो मदाय कं पयो दुहन्त्यायवः ।

9.062.20c देवा देवेभ्यो मधु ॥

9.062.21a आ नः सोमं पवित्र आ सृजता मधुमत्तमम् ।

9.062.21c देवेभ्यो देवश्रुत्तमम् ॥

9.062.22a एते सोमा असृक्षत गृणानाः श्रवसे महे ।

9.062.22c मदिन्तमस्य धारया ॥

9.062.23a अभि गव्यानि वीतये नृम्णा पुनानो अर्षसि ।

9.062.23c सनद्वाजः परि स्रव ॥

9.062.24a उत नो गोमतीरिषो विश्वा अर्ष परिष्टुभः ।

9.062.24c गृणानो जमदग्निना ॥

9.062.25a पवस्व वाचो अग्रियः सोम चित्राभिरूतिभिः ।

9.062.25c अभि विश्वानि काव्या ॥

9.062.26a त्वं समुद्रिया अपोऽग्रियो वाच ईरयन् ।

9.062.26c पवस्व विश्वमेजय ॥

9.062.27a तुभ्येमा भुवना कवे महिम्ने सोम तस्थिरे ।

9.062.27c तुभ्यमर्षन्ति सिन्धवः ॥

9.062.28a प्र ते दिवो न वृष्टयो धारा यन्त्यसश्चतः ।

9.062.28c अभि शुक्रामुपस्तिरम् ॥

9.062.29a इन्द्रायेन्दुं पुनीतनोग्रं दक्षाय साधनम् ।

9.062.29c ईशानं वीतिराधसम् ॥

9.062.30a पवमान ऋतः कविः सोमः पवित्रमासदत् ।

9.062.30c दधत्स्तोत्रे सुवीर्यम् ॥

9.063.01a आ पवस्व सहस्रिणं रयिं सोम सुवीर्यम् ।

9.063.01c अस्मे श्रवांसि धारय ॥

9.063.02a इषमूर्जं च पिन्वस इन्द्राय मत्सरिन्तमः ।

9.063.02c चमूष्वा नि षीदसि ॥

9.063.03a सुत इन्द्राय विष्णवे सोमः कलशे अक्षरत् ।

9.063.03c मधुमाँ अस्तु वायवे ॥

9.063.04a एते असृग्रमाशवोऽति ह्वरांसि बभ्रवः ।

9.063.04c सोमा ऋतस्य धारया ॥

9.063.05a इन्द्रं वर्धन्तो अप्तुरः कृण्वन्तो विश्वमार्यम् ।

9.063.05c अपघ्नन्तो अराव्णः ॥

9.063.06a सुता अनु स्वमा रजोऽभ्यर्षन्ति बभ्रवः ।

9.063.06c इन्द्रं गच्छन्त इन्दवः ॥

9.063.07a अया पवस्व धारया यया सूर्यमरोचयः ।

9.063.07c हिन्वानो मानुषीरपः ॥

9.063.08a अयुक्त सूर एतशं पवमानो मनावधि ।

9.063.08c अन्तरिक्षेण यातवे ॥

9.063.09a उत त्या हरितो दश सूरो अयुक्त यातवे ।

9.063.09c इन्दुरिन्द्र इति ब्रुवन् ॥

9.063.10a परीतो वायवे सुतं गिर इन्द्राय मत्सरम् ।

9.063.10c अव्यो वारेषु सिञ्चत ॥

9.063.11a पवमान विदा रयिमस्मभ्यं सोम दुष्टरम् ।

9.063.11c यो दूणाशो वनुष्यता ॥

9.063.12a अभ्यर्ष सहस्रिणं रयिं गोमन्तमश्विनम् ।

9.063.12c अभि वाजमुत श्रवः ॥

9.063.13a सोमो देवो न सूर्योऽद्रिभिः पवते सुतः ।

9.063.13c दधानः कलशे रसम् ॥

9.063.14a एते धामान्यार्या शुक्रा ऋतस्य धारया ।

9.063.14c वाजं गोमन्तमक्षरन् ॥

9.063.15a सुता इन्द्राय वज्रिणे सोमासो दध्याशिरः ।

9.063.15c पवित्रमत्यक्षरन् ॥

9.063.16a प्र सोम मधुमत्तमो राये अर्ष पवित्र आ ।

9.063.16c मदो यो देववीतमः ॥

9.063.17a तमी मृजन्त्यायवो हरिं नदीषु वाजिनम् ।

9.063.17c इन्दुमिन्द्राय मत्सरम् ॥

9.063.18a आ पवस्व हिरण्यवदश्वावत्सोम वीरवत् ।

9.063.18c वाजं गोमन्तमा भर ॥

9.063.19a परि वाजे न वाजयुमव्यो वारेषु सिञ्चत ।

9.063.19c इन्द्राय मधुमत्तमम् ॥

9.063.20a कविं मृजन्ति मर्ज्यं धीभिर्विप्रा अवस्यवः ।

9.063.20c वृषा कनिक्रदर्षति ॥

9.063.21a वृषणं धीभिरप्तुरं सोममृतस्य धारया ।

9.063.21c मती विप्राः समस्वरन् ॥

9.063.22a पवस्व देवायुषगिन्द्रं गच्छतु ते मदः ।

9.063.22c वायुमा रोह धर्मणा ॥

9.063.23a पवमान नि तोशसे रयिं सोम श्रवाय्यम् ।

9.063.23c प्रियः समुद्रमा विश ॥

9.063.24a अपघ्नन्पवसे मृधः क्रतुवित्सोम मत्सरः ।

9.063.24c नुदस्वादेवयुं जनम् ॥

9.063.25a पवमाना असृक्षत सोमाः शुक्रास इन्दवः ।

9.063.25c अभि विश्वानि काव्या ॥

9.063.26a पवमानास आशवः शुभ्रा असृग्रमिन्दवः ।

9.063.26c घ्नन्तो विश्वा अप द्विषः ॥

9.063.27a पवमाना दिवस्पर्यन्तरिक्षादसृक्षत ।

9.063.27c पृथिव्या अधि सानवि ॥

9.063.28a पुनानः सोम धारयेन्दो विश्वा अप स्रिधः ।

9.063.28c जहि रक्षांसि सुक्रतो ॥

9.063.29a अपघ्नन्सोम रक्षसोऽभ्यर्ष कनिक्रदत् ।

9.063.29c द्युमन्तं शुष्ममुत्तमम् ॥

9.063.30a अस्मे वसूनि धारय सोम दिव्यानि पार्थिवा ।

9.063.30c इन्दो विश्वानि वार्या ॥

9.064.01a वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः ।

9.064.01c वृषा धर्माणि दधिषे ॥

9.064.02a वृष्णस्ते वृष्ण्यं शवो वृषा वनं वृषा मदः ।

9.064.02c सत्यं वृषन्वृषेदसि ॥

9.064.03a अश्वो न चक्रदो वृषा सं गा इन्दो समर्वतः ।

9.064.03c वि नो राये दुरो वृधि ॥

9.064.04a असृक्षत प्र वाजिनो गव्या सोमासो अश्वया ।

9.064.04c शुक्रासो वीरयाशवः ॥

9.064.05a शुम्भमाना ऋतायुभिर्मृज्यमाना गभस्त्योः ।

9.064.05c पवन्ते वारे अव्यये ॥

9.064.06a ते विश्वा दाशुषे वसु सोमा दिव्यानि पार्थिवा ।

9.064.06c पवन्तामान्तरिक्ष्या ॥

9.064.07a पवमानस्य विश्ववित्प्र ते सर्गा असृक्षत ।

9.064.07c सूर्यस्येव न रश्मयः ॥

9.064.08a केतुं कृण्वन्दिवस्परि विश्वा रूपाभ्यर्षसि ।

9.064.08c समुद्रः सोम पिन्वसे ॥

9.064.09a हिन्वानो वाचमिष्यसि पवमान विधर्मणि ।

9.064.09c अक्रान्देवो न सूर्यः ॥

9.064.10a इन्दुः पविष्ट चेतनः प्रियः कवीनां मती ।

9.064.10c सृजदश्वं रथीरिव ॥

9.064.11a ऊर्मिर्यस्ते पवित्र आ देवावीः पर्यक्षरत् ।

9.064.11c सीदन्नृतस्य योनिमा ॥

9.064.12a स नो अर्ष पवित्र आ मदो यो देववीतमः ।

9.064.12c इन्दविन्द्राय पीतये ॥

9.064.13a इषे पवस्व धारया मृज्यमानो मनीषिभिः ।

9.064.13c इन्दो रुचाभि गा इहि ॥

9.064.14a पुनानो वरिवस्कृध्यूर्जं जनाय गिर्वणः ।

9.064.14c हरे सृजान आशिरम् ॥

9.064.15a पुनानो देववीतय इन्द्रस्य याहि निष्कृतम् ।

9.064.15c द्युतानो वाजिभिर्यतः ॥

9.064.16a प्र हिन्वानास इन्दवोऽच्छा समुद्रमाशवः ।

9.064.16c धिया जूता असृक्षत ॥

9.064.17a मर्मृजानास आयवो वृथा समुद्रमिन्दवः ।

9.064.17c अग्मन्नृतस्य योनिमा ॥

9.064.18a परि णो याह्यस्मयुर्विश्वा वसून्योजसा ।

9.064.18c पाहि नः शर्म वीरवत् ॥

9.064.19a मिमाति वह्निरेतशः पदं युजान ऋक्वभिः ।

9.064.19c प्र यत्समुद्र आहितः ॥

9.064.20a आ यद्योनिं हिरण्ययमाशुर्ऋतस्य सीदति ।

9.064.20c जहात्यप्रचेतसः ॥

9.064.21a अभि वेना अनूषतेयक्षन्ति प्रचेतसः ।

9.064.21c मज्जन्त्यविचेतसः ॥

9.064.22a इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः ।

9.064.22c ऋतस्य योनिमासदम् ॥

9.064.23a तं त्वा विप्रा वचोविदः परि ष्कृण्वन्ति वेधसः ।

9.064.23c सं त्वा मृजन्त्यायवः ॥

9.064.24a रसं ते मित्रो अर्यमा पिबन्ति वरुणः कवे ।

9.064.24c पवमानस्य मरुतः ॥

9.064.25a त्वं सोम विपश्चितं पुनानो वाचमिष्यसि ।

9.064.25c इन्दो सहस्रभर्णसम् ॥

9.064.26a उतो सहस्रभर्णसं वाचं सोम मखस्युवम् ।

9.064.26c पुनान इन्दवा भर ॥

9.064.27a पुनान इन्दवेषां पुरुहूत जनानाम् ।

9.064.27c प्रियः समुद्रमा विश ॥

9.064.28a दविद्युतत्या रुचा परिष्टोभन्त्या कृपा ।

9.064.28c सोमाः शुक्रा गवाशिरः ॥

9.064.29a हिन्वानो हेतृभिर्यत आ वाजं वाज्यक्रमीत् ।

9.064.29c सीदन्तो वनुषो यथा ॥

9.064.30a ऋधक्सोम स्वस्तये संजग्मानो दिवः कविः ।

9.064.30c पवस्व सूर्यो दृशे ॥

9.065.01a हिन्वन्ति सूरमुस्रयः स्वसारो जामयस्पतिम् ।

9.065.01c महामिन्दुं महीयुवः ॥

9.065.02a पवमान रुचारुचा देवो देवेभ्यस्परि ।

9.065.02c विश्वा वसून्या विश ॥

9.065.03a आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः ।

9.065.03c इषे पवस्व संयतम् ॥

9.065.04a वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे ।

9.065.04c पवमान स्वाध्यः ॥

9.065.05a आ पवस्व सुवीर्यं मन्दमानः स्वायुध ।

9.065.05c इहो ष्विन्दवा गहि ॥

9.065.06a यदद्भिः परिषिच्यसे मृज्यमानो गभस्त्योः ।

9.065.06c द्रुणा सधस्थमश्नुषे ॥

9.065.07a प्र सोमाय व्यश्ववत्पवमानाय गायत ।

9.065.07c महे सहस्रचक्षसे ॥

9.065.08a यस्य वर्णं मधुश्चुतं हरिं हिन्वन्त्यद्रिभिः ।

9.065.08c इन्दुमिन्द्राय पीतये ॥

9.065.09a तस्य ते वाजिनो वयं विश्वा धनानि जिग्युषः ।

9.065.09c सखित्वमा वृणीमहे ॥

9.065.10a वृषा पवस्व धारया मरुत्वते च मत्सरः ।

9.065.10c विश्वा दधान ओजसा ॥

9.065.11a तं त्वा धर्तारमोण्योः पवमान स्वर्दृशम् ।

9.065.11c हिन्वे वाजेषु वाजिनम् ॥

9.065.12a अया चित्तो विपानया हरिः पवस्व धारया ।

9.065.12c युजं वाजेषु चोदय ॥

9.065.13a आ न इन्दो महीमिषं पवस्व विश्वदर्शतः ।

9.065.13c अस्मभ्यं सोम गातुवित् ॥

9.065.14a आ कलशा अनूषतेन्दो धाराभिरोजसा ।

9.065.14c एन्द्रस्य पीतये विश ॥

9.065.15a यस्य ते मद्यं रसं तीव्रं दुहन्त्यद्रिभिः ।

9.065.15c स पवस्वाभिमातिहा ॥

9.065.16a राजा मेधाभिरीयते पवमानो मनावधि ।

9.065.16c अन्तरिक्षेण यातवे ॥

9.065.17a आ न इन्दो शतग्विनं गवां पोषं स्वश्व्यम्।

9.065.17c वहा भगत्तिमूतये॥

9.065.18a आ नः सोम सहो जुवो रूपं न वर्चसे भर।

9.065.18c सुष्वाणो देववीतये॥

9.065.19a अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत्।

9.065.19c सीदञ्छ्येनो न योनिमा॥

9.065.20a अप्सा इन्द्राय वायवे वरुणाय मरुद्भ्यः।

9.065.20c सोमो अर्षति विष्णवे॥

9.065.21a इषं तोकाय नो दधदस्मभ्यं सोम विश्वतः।

9.065.21c आ पवस्व सहस्रिणम्॥

9.065.22a ये सोमासः परावति ये अर्वावति सुन्विरे।

9.065.22c ये वादः शर्यणावति॥

9.065.23a य आर्जीकेषु कृत्वसु ये मध्ये पस्त्यानाम्।

9.065.23c ये वा जनेषु पञ्चसु॥

9.065.24a ते नो वृष्टिं दिवस्परि पवन्तामा सुवीर्यम्।

9.065.24c सुवाना देवास इन्दवः॥

9.065.25a पवते हर्यतो हरिर्गृणानो जमदग्निना।

9.065.25c हिन्वानो गोरधि त्वचि॥

9.065.26a प्र शुक्रासो वयोजुवो हिन्वानासो न सप्तयः ।

9.065.26c श्रीणाना अप्सु मृञ्जत ॥

9.065.27a तं त्वा सुतेष्वाभुवो हिन्विरे देवतातये ।

9.065.27c स पवस्वानया रुचा ॥

9.065.28a आ ते दक्षं मयोभुवं वह्निमद्या वृणीमहे ।

9.065.28c पान्तमा पुरुस्पृहम् ॥

9.065.29a आ मन्द्रमा वरेण्यमा विप्रमा मनीषिणम् ।

9.065.29c पान्तमा पुरुस्पृहम् ॥

9.065.30a आ रयिमा सुचेतुनमा सुक्रतो तनूष्वा ।

9.065.30c पान्तमा पुरुस्पृहम् ॥

9.066.01a पवस्व विश्वचर्षणेऽभि विश्वानि काव्या ।

9.066.01c सखा सखिभ्य ईड्यः ॥

9.066.02a ताभ्यां विश्वस्य राजसि ये पवमान धामनी ।

9.066.02c प्रतीची सोम तस्थतुः ॥

9.066.03a परि धामानि यानि ते त्वं सोमासि विश्वतः ।

9.066.03c पवमान ऋतुभिः कवे ॥

9.066.04a पवस्व जनयन्निषोऽभि विश्वानि वार्या ।

9.066.04c सखा सखिभ्य ऊतये ॥

9.066.05a तव शुक्रासो अर्चयो दिवस्पृष्ठे वि तन्वते ।

9.066.05c पवित्रं सोम धामभिः ॥

9.066.06a तवेमे सप्त सिन्धवः प्रशिषं सोम सिस्रते ।

9.066.06c तुभ्यं धावन्ति धेनवः ॥

9.066.07a प्र सोम याहि धारया सुत इन्द्राय मत्सरः ।

9.066.07c दधानो अक्षिति श्रवः ॥

9.066.08a समु त्वा धीभिरस्वरन्हिन्वतीः सप्त जामयः ।

9.066.08c विप्रमाजा विवस्वतः ॥

9.066.09a मृजन्ति त्वा समग्रुवोऽव्ये जीरावधि ष्वणि ।

9.066.09c रेभो यदज्यसे वने ॥

9.066.10a पवमानस्य ते कवे वाजिन्सर्गा असृक्षत ।

9.066.10c अर्वन्तो न श्रवस्यवः ॥

9.066.11a अच्छा कोशं मधुश्चुतमसृग्रं वारे अव्यये ।

9.066.11c अवावशन्त धीतयः ॥

9.066.12a अच्छा समुद्रमिन्दवोऽस्तं गावो न धेनवः ।

9.066.12c अग्मन्नृतस्य योनिमा ॥

9.066.13a प्र ण इन्दो महे रण आपो अर्षन्ति सिन्धवः ।

9.066.13c यद्गोभिर्वासयिष्यसे ॥

9.066.14a अस्य ते सख्ये वयमियक्षन्तस्त्वोतयः ।

9.066.14c इन्दो सखित्वमुश्मसि ॥

9.066.15a आ पवस्व गविष्टये महे सोम नृचक्षसे ।

9.066.15c एन्द्रस्य जठरे विश ॥

9.066.16a महाँ असि सोम ज्येष्ठ उग्राणामिन्द ओजिष्ठः ।

9.066.16c युध्वा सञ्छश्वज्जिगेथ ॥

9.066.17a य उग्रेभ्यश्चिदोजीयाञ्छूरेभ्यश्चिच्छूरतरः ।

9.066.17c भूरिदाभ्यश्चिन्मंहीयान् ॥

9.066.18a त्वं सोम सूर एषस्तोकस्य साता तनूनाम् ।

9.066.18c वृणीमहे सख्याय वृणीमहे युज्याय ॥

9.066.19a अग्न आयूंषि पवस आ सुवोर्जमिषं च नः ।

9.066.19c आरे बाधस्व दुच्छुनाम् ॥

9.066.20a अग्निरृषिः पवमानः पाञ्चजन्यः पुरोहितः ।

9.066.20c तमीमहे महागयम् ॥

9.066.21a अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम् ।

9.066.21c दधद्रयिं मयि पोषम् ॥

9.066.22a पवमानो अति स्रिधोऽभ्यर्षति सुष्टुतिम् ।

9.066.22c सूरो न विश्वदर्शतः ॥

9.066.23a स मर्मृजान आयुभिः प्रयस्वान्प्रयसे हितः ।

9.066.23c इन्दुरत्यो विचक्षणः ॥

9.066.24a पवमान ऋतं बृहच्छुक्रं ज्योतिरजीजनत् ।

9.066.24c कृष्णा तमांसि जङ्घनत् ॥

9.066.25a पवमानस्य जङ्घ्नतो हरेश्चन्द्रा असृक्षत ।

9.066.25c जीरा अजिरशोचिषः ॥

9.066.26a पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः ।

9.066.26c हरिश्चन्द्रो मरुद्गणः ॥

9.066.27a पवमानो व्यश्नवद्रश्मिभिर्वाजसातमः ।

9.066.27c दधत्स्तोत्रे सुवीर्यम् ॥

9.066.28a प्र सुवान इन्दुरक्षाः पवित्रमत्यव्ययम् ।

9.066.28c पुनान इन्दुरिन्द्रमा ॥

9.066.29a एष सोमो अधि त्वचि गवां क्रीळत्यद्रिभिः ।

9.066.29c इन्द्रं मदाय जोहुवत् ॥

9.066.30a यस्य ते द्युम्नवत्पयः पवमानाभृतं दिवः ।

9.066.30c तेन नो मृळ जीवसे ॥

9.067.01a त्वं सोमासि धारयुर्मन्द्र ओजिष्ठो अध्वरे ।

9.067.01c पवस्व मंहयद्रयिः ॥

9.067.02a त्वं सुतो नृमादनो दधन्वान्मत्सरिन्तमः ।

9.067.02c इन्द्राय सूरिरन्धसा ॥

9.067.03a त्वं सुष्वाणो अद्रिभिरभ्यर्ष कनिक्रदत् ।

9.067.03c द्युमन्तं शुष्ममुत्तमम् ॥

9.067.04a इन्दुर्हिन्वानो अर्षति तिरो वाराण्यव्यया ।

9.067.04c हरिर्वाजमचिक्रदत् ॥

9.067.05a इन्दो व्यव्यमर्षसि वि श्रवांसि वि सौभगा ।

9.067.05c वि वाजान्सोम गोमतः ॥

9.067.06a आ न इन्दो शतग्विनं रयिं गोमन्तमश्विनम् ।

9.067.06c भरा सोम सहस्रिणम् ॥

9.067.07a पवमानास इन्दवस्तिरः पवित्रमाशवः ।

9.067.07c इन्द्रं यामेभिराशत ॥

9.067.08a ककुहः सोम्यो रस इन्दुरिन्द्राय पूर्व्यः ।

9.067.08c आयुः पवत आयवे ॥

9.067.09a हिन्वन्ति सूरमुस्रयः पवमानं मधुश्चुतम् ।

9.067.09c अभि गिरा समस्वरन् ॥

9.067.10a अविता नो अजाश्वः पूषा यामनियामनि ।

9.067.10c आ भक्षत्कन्यासु नः ॥

9.067.11a अयं सोमः कपर्दिने घृतं न पवते मधु ।

9.067.11c आ भक्षत्कन्यासु नः ॥

9.067.12a अयं त आघृणे सुतो घृतं न पवते शुचि ।

9.067.12c आ भक्षत्कन्यासु नः ॥

9.067.13a वाचो जन्तुः कवीनां पवस्व सोम धारया ।

9.067.13c देवेषु रत्नधा असि ॥

9.067.14a आ कलशेषु धावति श्येनो वर्म वि गाहते ।

9.067.14c अभि द्रोणा कनिक्रदत् ॥

9.067.15a परि प्र सोम ते रसोऽसर्जि कलशे सुतः ।

9.067.15c श्येनो न तक्तो अर्षति ॥

9.067.16a पवस्व सोम मन्दयन्निन्द्राय मधुमत्तमः ॥

9.067.17a असृग्रन्देववीतये वाजयन्तो रथा इव ॥

9.067.18a ते सुतासो मदिन्तमाः शुक्रा वायुमसृक्षत ॥

9.067.19a ग्राव्णा तुन्नो अभिष्टुतः पवित्रं सोम गच्छसि ।

9.067.19c दधत्स्तोत्रे सुवीर्यम् ॥

9.067.20a एष तुन्नो अभिष्टुतः पवित्रमति गाहते ।

9.067.20c रक्षोहा वारमव्ययम् ॥

9.067.21a यदन्ति यच्च दूरके भयं विन्दति मामिह ।

9.067.21c पवमान वि तज्जहि ॥

9.067.22a पवमानः सो अद्य नः पवित्रेण विचर्षणिः ।

9.067.22c यः पोता स पुनातु नः ॥

9.067.23a यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा ।

9.067.23c ब्रह्म तेन पुनीहि नः ॥

9.067.24a यत्ते पवित्रमर्चिवदग्ने तेन पुनीहि नः ।

9.067.24c ब्रह्मसवैः पुनीहि नः ॥

9.067.25a उभाभ्यां देव सवितः पवित्रेण सवेन च ।

9.067.25c मां पुनीहि विश्वतः ॥

9.067.26a त्रिभिष्ट्वं देव सवितर्वर्षिष्ठैः सोम धामभिः ।

9.067.26c अग्ने दक्षैः पुनीहि नः ॥

9.067.27a पुनन्तु मां देवजनाः पुनन्तु वसवो धिया ।

9.067.27c विश्वे देवाः पुनीत मा जातवेदः पुनीहि मा ॥

9.067.28a प्र प्यायस्व प्र स्यन्दस्व सोम विश्वेभिरंशुभिः ।

9.067.28c देवेभ्य उत्तमं हविः ॥

9.067.29a उप प्रियं पनिप्नतं युवानमाहुतीवृधम् ।

9.067.29c अगन्म बिभ्रतो नमः ॥

9.067.30a अलाय्यस्य परशुर्ननाश तमा पवस्व देव सोम ।

9.067.30c आखुं चिदेव देव सोम ॥

9.067.31a यः पावमानीरध्येत्यृषिभिः सम्भृतं रसम् ।

9.067.31c सर्वं स पूतमश्नाति स्वदितं मातरिश्वना ॥

9.067.32a पावमानीर्यो अध्येत्यृषिभिः सम्भृतं रसम् ।

9.067.32c तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकम् ॥

9.068.01a प्र देवमच्छा मधुमन्त इन्दवोऽसिष्यदन्त गाव आ न धेनवः ।

9.068.01c बर्हिषदो वचनावन्त ऊधभिः परिस्रुतमुस्रिया निर्णिजं धिरे ॥

9.068.02a स रोरुवदभि पूर्वा अचिक्रददुपारुहः श्रथयन्स्वादते हरिः ।

9.068.02c तिरः पवित्रं परियन्नुरु ज्रयो नि शर्याणि दधते देव आ वरम् ॥

9.068.03a वि यो ममे यम्या संयती मदः साकंवृधा पयसा पिन्वदक्षिता ।

9.068.03c मही अपारे रजसी विवेविददभिव्रजन्नक्षितं पाज आ ददे ॥

9.068.04a स मातरा विचरन्वाजयन्नपः प्र मेधिरः स्वधया पिन्वते पदम् ।

9.068.04c अंशुर्यवेन पिपिशे यतो नृभिः सं जामिभिर्नसते रक्षते शिरः ॥

9.068.05a सं दक्षेण मनसा जायते कविरृतस्य गर्भो निहितो यमा परः ।

9.068.05c यूना ह सन्ता प्रथमं वि जज्ञतुर्गुहा हितं जनिम नेममुद्यतम् ॥

9.068.06a मन्द्रस्य रूपं विविदुर्मनीषिणः श्येनो यदन्धो अभरत्परावतः ।

9.068.06c तं मर्जयन्त सुवृधं नदीष्वाँ उशन्तमंशुं परियन्तमृग्मियम् ॥

9.068.07a त्वां मृजन्ति दश योषणः सुतं सोम ऋषिभिर्मतिभिर्धीतिभिर्हितम् ।

9.068.07c अव्यो वारेभिरुत देवहूतिभिर्नृभिर्यतो वाजमा दर्षि सातये ॥

9.068.08a परिप्रयन्तं वय्यं सुषंसदं सोमं मनीषा अभ्यनूषत स्तुभः ।

9.068.08c यो धारया मधुमाँ ऊर्मिणा दिव इयर्ति वाचं रयिषाळमर्त्यः ॥

9.068.09a अयं दिव इयर्ति विश्वमा रजः सोमः पुनानः कलशेषु सीदति ।

9.068.09c अद्भिर्गोभिर्मृज्यते अद्रिभिः सुतः पुनान इन्दुर्वरिवो विदत्प्रियम् ॥

9.068.10a एवा नः सोम परिषिच्यमानो वयो दधच्चित्रतमं पवस्व ।

9.068.10c अद्वेषे द्यावापृथिवी हुवेम देवा धत्त रयिमस्मे सुवीरम् ॥

9.069.01a इषुर्न धन्वन्प्रति धीयते मतिर्वत्सो न मातुरुप सर्ज्यूधनि ।

9.069.01c उरुधारेव दुहे अग्र आयत्यस्य व्रतेष्वपि सोम इष्यते ॥

9.069.02a उपो मतिः पृच्यते सिच्यते मधु मन्द्राजनी चोदते अन्तरासनि ।

9.069.02c पवमानः संतनिः प्रघ्नतामिव मधुमान्द्रप्सः परि वारमर्षति ॥

9.069.03a अव्ये वधूयुः पवते परि त्वचि श्रथ्नीते नप्तीरदितेर्ऋतं यते ।

9.069.03c हरिरक्रान्यजतः संयतो मदो नृम्णा शिशानो महिषो न शोभते ॥

9.069.04a उक्षा मिमाति प्रति यन्ति धेनवो देवस्य देवीरुप यन्ति निष्कृतम् ।

9.069.04c अत्यक्रमीदर्जुनं वारमव्ययमत्कं न निक्तं परि सोमो अव्यत ॥

9.069.05a अमृक्तेन रुशता वाससा हरिरमर्त्यो निर्णिजानः परि व्यत ।

9.069.05c दिवस्पृष्ठं बर्हणा निर्णिजे कृतोपस्तरणं चम्वोर्नभस्मयम् ॥

9.069.06a सूर्यस्येव रश्मयो द्रावयित्नवो मत्सरासः प्रसुपः साकमीरते ।

9.069.06c तन्तुं ततं परि सर्गास आशवो नेन्द्रादृते पवते धाम किं चन ॥

9.069.07a सिन्धोरिव प्रवणे निम्न आशवो वृषच्युता मदासो गातुमाशत ।

9.069.07c शं नो निवेशे द्विपदे चतुष्पदेऽस्मे वाजाः सोम तिष्ठन्तु कृष्टयः ॥

9.069.08a आ नः पवस्व वसुमद्धिरण्यवदश्वावद्गोमद्यवमत्सुवीर्यम् ।

9.069.08c यूयं हि सोम पितरो मम स्थन दिवो मूर्धानः प्रस्थिता वयस्कृतः ॥

9.069.09a एते सोमाः पवमानास इन्द्रं रथा इव प्र ययुः सातिमच्छ ।

9.069.09c सुताः पवित्रमति यन्त्यव्यं हित्वी वव्रिं हरितो वृष्टिमच्छ ॥

9.069.10a इन्दविन्द्राय बृहते पवस्व सुमृळीको अनवद्यो रिशादाः ।

9.069.10c भरा चन्द्राणि गृणते वसूनि देवैर्द्यावापृथिवी प्रावतं नः ॥

9.070.01a त्रिरस्मै सप्त धेनवो दुदुह्रे सत्यामाशिरं पूर्व्ये व्योमनि ।

9.070.01c चत्वार्यन्या भुवनानि निर्णिजे चारूणि चक्रे यदृतैरवर्धत ॥

9.070.02a स भिक्षमाणो अमृतस्य चारुण उभे द्यावा काव्येना वि शश्रथे ।

9.070.02c तेजिष्ठा अपो मंहना परि व्यत यदी देवस्य श्रवसा सदो विदुः ॥

9.070.03a ते अस्य सन्तु केतवोऽमृत्यवोऽदाभ्यासो जनुषी उभे अनु ।

9.070.03c येभिर्नृम्णा च देव्या च पुनत आदिद्राजानं मनना अगृभ्णत ॥

9.070.04a स मृज्यमानो दशभिः सुकर्मभिः प्र मध्यमासु मातृषु प्रमे सचा ।

9.070.04c व्रतानि पानो अमृतस्य चारुण उभे नृचक्षा अनु पश्यते विशौ ॥

9.070.05a स मर्मृजान इन्द्रियाय धायस ओभे अन्ता रोदसी हर्षते हितः ।

9.070.05c वृषा शुष्मेण बाधते वि दुर्मतीरादेदिशानः शर्यहेव शुरुधः ॥

9.070.06a स मातरा न ददृशान उस्त्रियो नानददेति मरुतामिव स्वनः ।

9.070.06c जानन्नृतं प्रथमं यत्स्वर्णरं प्रशस्तये कमवृणीत सुक्रतुः ॥

9.070.07a रुवति भीमो वृषभस्तविष्यया शृङ्गे शिशानो हरिणी विचक्षणः ।

9.070.07c आ योनिं सोमः सुकृतं नि षीदति गव्ययी त्वग्भवति निर्णिगव्ययी ॥

9.070.08a शुचिः पुनानस्तन्वमरेपसमव्ये हरिर्न्यधाविष्ट सानवि ।

9.070.08c जुष्टो मित्राय वरुणाय वायवे त्रिधातु मधु क्रियते सुकर्मभिः ॥

9.070.09a पवस्व सोम देववीतये वृषेन्द्रस्य हार्दि सोमधानमा विश ।

9.070.09c पुरा नो बाधाद्दुरिताति पारय क्षेत्रविद्धि दिश आहा विपृच्छते ॥

9.070.10a हितो न सप्तिरभि वाजमर्षेन्द्रस्येन्दो जठरमा पवस्व ।

9.070.10c नावा न सिन्धुमति पर्षि विद्वाञ्छूरो न युध्यन्नव नो निद स्पः ॥

9.071.01a आ दक्षिणा सृज्यते शुष्म्याऽसदं वेति द्रुहो रक्षसः पाति जागृविः ।

9.071.01c हरिरोपशं कृणुते नभस्पय उपस्तिरे चम्वो३र्ब्रह्म निर्णिजे ॥

9.071.02a प्र कृष्टिहेव शूष एति रोरुवदसुर्य१ं वर्णं नि रिणीते अस्य तम् ।

9.071.02c जहाति वव्रिं पितुरेति निष्कृतमुपप्रुतं कृणुते निर्णिजं तना ॥

9.071.03a अद्रिभिः सुतः पवते गभस्त्योर्वृषायते नभसा वेपते मती ।

9.071.03c स मोदते नसते साधते गिरा नेनिक्ते अप्सु यजते परीमणि ॥

9.071.04a परि द्युक्षं सहसः पर्वतावृधं मध्वः सिञ्चन्ति हर्म्यस्य सक्षणिम् ।

9.071.04c आ यस्मिन्गावः सुहुताद ऊधनि मूर्धञ्छ्रीणन्त्यग्रियं वरीमभिः ॥

9.071.05a समी रथं न भुरिजोरहेषत दश स्वसारो अदितेरुपस्थ आ ।

9.071.05c जिगादुप ज्रयति गोरपीच्यं पदं यदस्य मतुथा अजीजनन् ॥

9.071.06a श्येनो न योनिं सदनं धिया कृतं हिरण्ययमासदं देव एषति ।

9.071.06c ए रिणन्ति बर्हिषि प्रियं गिराश्वो न देवाँ अप्येति यज्ञियः ॥

9.071.07a परा व्यक्तो अरुषो दिवः कविर्वृषा त्रिपृष्ठो अनविष्ट गा अभि ।

9.071.07c सहस्रणीतिर्यतिः परायती रेभो न पूर्वीरुषसो वि राजति ॥

9.071.08a त्वेषं रूपं कृणुते वर्णो अस्य स यत्राशयत्समृता सेधति स्रिधः ।

9.071.08c अप्सा याति स्वधया दैव्यं जनं सं सुष्टुती नसते सं गोअग्रया ॥

9.071.09a उक्षेव यूथा परियन्नरावीदधि त्विषीरधित सूर्यस्य ।

9.071.09c दिव्यः सुपर्णोऽव चक्षत क्षां सोमः परि क्रतुना पश्यते जाः ॥

9.072.01a हरिं मृजन्त्यरुषो न युज्यते सं धेनुभिः कलशे सोमो अज्यते ।

9.072.01c उद्वाचमीरयति हिन्वते मती पुरुष्टुतस्य कति चित्परिप्रियः ॥

9.072.02a साकं वदन्ति बहवो मनीषिण इन्द्रस्य सोमं जठरे यदादुहुः ।

9.072.02c यदी मृजन्ति सुगभस्तयो नरः सनीळाभिर्दशभिः काम्यं मधु ॥

9.072.03a अरममाणो अत्येति गा अभि सूर्यस्य प्रियं दुहितुस्तिरो रवम् ।

9.072.03c अन्वस्मै जोषमभरद्विनंगृसः सं द्वयीभिः स्वसृभिः क्षेति जामिभिः ॥

9.072.04a नृधूतो अद्रिषुतो बर्हिषि प्रियः पतिर्गवां प्रदिव इन्दुरृत्वियः ।

9.072.04c पुरंधिवान्मनुषो यज्ञसाधनः शुचिर्धिया पवते सोम इन्द्र ते ॥

9.072.05a नृबाहुभ्यां चोदितो धारया सुतोऽनुष्वधं पवते सोम इन्द्र ते ।

9.072.05c आप्राः क्रतून्समजैरध्वरे मतीर्वेर्न द्रुषच्चम्वोऽ३रासदद्धरिः ॥

9.072.06a अंशुं दुहन्ति स्तनयन्तमक्षितं कविं कवयोऽपसो मनीषिणः ।

9.072.06c समी गावो मतयो यन्ति संयत ऋतस्य योना सदने पुनर्भुवः ॥

9.072.07a नाभा पृथिव्या धरुणो महो दिवो३ऽपामूर्मौ सिन्धुष्वन्तरुक्षितः ।

9.072.07c इन्द्रस्य वज्रो वृषभो विभूवसुः सोमो हृदे पवते चारु मत्सरः ॥

9.072.08a स तू पवस्व परि पार्थिवं रज स्तोत्रे शिक्षन्नाधून्वते च सुक्रतो ।

9.072.08c मा नो निर्भाग्वसुनः सादनस्पृशो रयिं पिशङ्गं बहुलं वसीमहि ॥

9.072.09a आ तू न इन्दो शतदात्वश्व्यं सहस्रदातु पशुमद्धिरण्यवत् ।

9.072.09c उप मास्व बृहती रेवतीरिषोऽधि स्तोत्रस्य पवमान नो गहि ॥

9.073.01a स्रक्वे द्रप्सस्य धमतः समस्वरन्नृतस्य योना समरन्त नाभयः ।

9.073.01c त्रीन्स मूर्ध्नो असुरश्चक्र आरभे सत्यस्य नावः सुकृतमपीपरन् ॥

9.073.02a सम्यक्सम्यञ्चो महिषा अहेषत सिन्धोरूर्मावधि वेना अवीविपन् ।

9.073.02c मधोर्धाराभिर्जनयन्तो अर्कमित्प्रियामिन्द्रस्य तन्वमवीवृधन् ॥

9.073.03a पवित्रवन्तः परि वाचमासते पितैषां प्रत्नो अभि रक्षति व्रतम् ।

9.073.03c महः समुद्रं वरुणस्तिरो दधे धीरा इच्छेकुर्धरुणेष्वारभम् ॥

9.073.04a सहस्रधारेऽव ते समस्वरन्दिवो नाके मधुजिह्वा असश्चतः ।

9.073.04c अस्य स्पशो न नि मिषन्ति भूर्णयः पदेपदे पाशिनः सन्ति सेतवः ॥

9.073.05a पितुर्मातुरध्या ये समस्वरन्नृचा शोचन्तः संदहन्तो अव्रतान् ।

9.073.05c इन्द्रद्विष्टामप धमन्ति मायया त्वचमसिक्नीं भूमनो दिवस्परि ॥

9.073.06a प्रत्नान्मानादध्या ये समस्वरञ्छ्लोकयन्त्रासो रभसस्य मन्तवः ।

9.073.06c अपानक्षासो बधिरा अहासत ऋतस्य पन्थां न तरन्ति दुष्कृतः ॥

9.073.07a सहस्रधारे वितते पवित्र आ वाचं पुनन्ति कवयो मनीषिणः ।

9.073.07c रुद्रास एषामिषिरासो अद्रुह स्पशः स्वञ्चः सुदृशो नृचक्षसः ॥

9.073.08a ऋतस्य गोपा न दभाय सुक्रतुस्त्री ष पवित्रा हृद्य१न्तरा दधे ।

9.073.08c विद्वान्स विश्वा भुवनाभि पश्यत्यवाजुष्टान्विध्यति कर्ते अव्रतान् ॥

9.073.09a ऋतस्य तन्तुर्विततः पवित्र आ जिह्वाया अग्रे वरुणस्य मायया ।

9.073.09c धीराश्चित्तत्समिनक्षन्त आशतात्रा कर्तमव पदात्यप्रभुः ॥

9.074.01a शिशुर्न जातोऽव चक्रदद्वने स्व१र्यद्वाज्यरुषः सिषासति ।

9.074.01c दिवो रेतसा सचते पयोवृधा तमीमहे सुमती शर्म सप्रथः ॥

9.074.02a दिवो य स्कम्भो धरुणः स्वातत आपूर्णो अंशुः पर्येति विश्वतः ।

9.074.02c सेमे मही रोदसी यक्षदावृता समीचीने दाधार समिषः कविः ॥

9.074.03a महि प्सरः सुकृतं सोम्यं मधूर्वी गव्यूतिरदितेरृतं यते ।

9.074.03c ईशे यो वृष्टेरित उस्रियो वृषापां नेता य इतऊतिरृग्मियः ॥

9.074.04a आत्मन्वन्नभो दुह्यते घृतं पय ऋतस्य नाभिरमृतं वि जायते ।

9.074.04c समीचीनाः सुदानवः प्रीणन्ति तं नरो हितमव मेहन्ति पेरवः ॥

9.074.05a अरावीदंशुः सचमान ऊर्मिणा देवाव्यं१ मनुषे पिन्वति त्वचम् ।

9.074.05c दधाति गर्भमदितेरुपस्थ आ येन तोकं च तनयं च धामहे ॥

9.074.06a सहस्रधारेऽव ता असश्चतस्तृतीये सन्तु रजसि प्रजावतीः ।

9.074.06c चतस्रो नाभो निहिता अवो दिवो हविर्भरन्त्यमृतं घृतश्चुतः ॥

9.074.07a श्वेतं रूपं कृणुते यत्सिषासति सोमो मीढ्वाँ असुरो वेद भूमनः ।

9.074.07c धिया शमी सचते सेमभि प्रवद्दिवस्कवन्धमव दर्षदुद्रिणम् ॥

9.074.08a अध श्वेतं कलशं गोभिरक्तं कार्ष्मन्ना वाज्यक्रमीत्ससवान् ।

9.074.08c आ हिन्विरे मनसा देवयन्तः कक्षीवते शतहिमाय गोनाम् ॥

9.074.09a अद्भिः सोम पपृचानस्य ते रसोऽव्यो वारं वि पवमान धावति ।

9.074.09c स मृज्यमानः कविभिर्मदिन्तम स्वदस्वेन्द्राय पवमान पीतये ॥

9.075.01a अभि प्रियाणि पवते चनोहितो नामानि यह्वो अधि येषु वर्धते ।

9.075.01c आ सूर्यस्य बृहतो बृहन्नधि रथं विष्वञ्चमरुहद्विचक्षणः ॥

9.075.02a ऋतस्य जिह्वा पवते मधु प्रियं वक्ता पतिर्धियो अस्या अदाभ्यः ।

9.075.02c दधाति पुत्रः पित्रोरपीच्यं१ नाम तृतीयमधि रोचने दिवः ॥

9.075.03a अव द्युतानः कलशाँ अचिक्रदन्नृभिर्येमानः कोश आ हिरण्यये ।

9.075.03c अभीमृतस्य दोहना अनूषताधि त्रिपृष्ठ उषसो वि राजति ॥

9.075.04a अद्रिभिः सुतो मतिभिश्चनोहितः प्ररोचयन्रोदसी मातरा शुचिः ।

9.075.04c रोमाण्यव्या समया वि धावति मधोर्धारा पिन्वमाना दिवेदिवे ॥

9.075.05a परि सोम प्र धन्वा स्वस्तये नृभिः पुनानो अभि वासयाशिरम् ।

9.075.05c ये ते मदा आहनसो विहायसस्तेभिरिन्द्रं चोदय दातवे मघम् ॥

9.076.01a धर्ता दिवः पवते कृत्व्यो रसो दक्षो देवानामनुमाद्यो नृभिः ।

9.076.01c हरिः सृजानो अत्यो न सत्वभिर्वृथा पाजांसि कृणुते नदीष्वा ॥

9.076.02a शूरो न धत्त आयुधा गभस्त्योः स्व१ः सिषासन्रथिरो गविष्टिषु ।

9.076.02c इन्द्रस्य शुष्ममीरयन्नपस्युभिरिन्दुर्हिन्वानो अज्यते मनीषिभिः ॥

9.076.03a इन्द्रस्य सोम पवमान ऊर्मिणा तविष्यमाणो जठरेष्वा विश ।

9.076.03c प्र णः पिन्व विद्युदभ्रेव रोदसी धिया न वाजाँ उप मासि शश्वतः ॥

9.076.04a विश्वस्य राजा पवते स्वर्दृश ऋतस्य धीतिमृषिषाळवीवशत् ।

9.076.04c यः सूर्यस्यासिरेण मृज्यते पिता मतीनामसमष्टकाव्यः ॥

9.076.05a वृषेव यूथा परि कोशमर्षस्यपामुपस्थे वृषभः कनिक्रदत् ।

9.076.05c स इन्द्राय पवसे मत्सरिन्तमो यथा जेषाम समिथे त्वोतयः ॥

9.077.01a एष प्र कोशे मधुमाँ अचिक्रददिन्द्रस्य वज्रो वपुषो वपुष्टरः ।

9.077.01c अभीमृतस्य सुदुघा घृतश्चुतो वाश्रा अर्षन्ति पयसेव धेनवः ॥

9.077.02a स पूर्व्यः पवते यं दिवस्परि श्येनो मथायदिषितस्तिरो रजः ।

9.077.02c स मध्व आ युवते वेविजान इत्कृशानोरस्तुर्मनसाह बिभ्युषा ॥

9.077.03a ते नः पूर्वास उपरास इन्दवो महे वाजाय धन्वन्तु गोमते ।

9.077.03c ईक्षेण्यासो अह्यो३ न चारवो ब्रह्मब्रह्म ये जुजुषुर्हविर्हविः ॥

9.077.04a अयं नो विद्वान्वनवद्वनुष्यत इन्दुः सत्राचा मनसा पुरुष्टुतः ।

9.077.04c इनस्य यः सदने गर्भमादधे गवामुरुब्जमभ्यर्षति व्रजम् ॥

9.077.05a चक्रिर्दिवः पवते कृत्व्यो रसो महाँ अदब्धो वरुणो हुरुग्यते ।

9.077.05c असावि मित्रो वृजनेषु यज्ञियोऽत्यो न यूथे वृषयुः कनिक्रदत् ॥

9.078.01a प्र राजा वाचं जनयन्नसिष्यददपो वसानो अभि गा इयक्षति ।

9.078.01c गृभ्णाति रिप्रमविरस्य तान्वा शुद्धो देवानामुप याति निष्कृतम् ॥

9.078.02a इन्द्राय सोम परि षिच्यसे नृभिर्नृचक्षा ऊर्मिः कविरज्यसे वने ।

9.078.02c पूर्वीर्हि ते स्रुतयः सन्ति यातवे सहस्रमश्वा हरयश्चमूषदः ॥

9.078.03a समुद्रिया अप्सरसो मनीषिणमासीना अन्तरभि सोममक्षरन् ।

9.078.03c ता ईं हिन्वन्ति हर्म्यस्य सक्षणिं याचन्ते सुम्नं पवमानमक्षितम् ॥

9.078.04a गोजिन्नः सोमो रथजिद्धिरण्यजित्स्वर्जिदब्जित्पवते सहस्रजित् ।

9.078.04c यं देवासश्चक्रिरे पीतये मदं स्वादिष्ठं द्रप्समरुणं मयोभुवम् ॥

9.078.05a एतानि सोम पवमानो अस्मयुः सत्यानि कृण्वन्द्रविणान्यर्षसि ।

9.078.05c जहि शत्रुमन्तिके दूरके च य उर्वीं गव्यूतिमभयं च नस्कृधि ॥

9.079.01a अचोदसो नो धन्वन्त्विन्दवः प्र सुवानासो बृहद्दिवेषु हरयः ।

9.079.01c वि च नशन्न इषो अरातयोऽर्यो नशन्त सनिषन्त नो धियः ॥

9.079.02a प्र णो धन्वन्त्विन्दवो मदच्युतो धना वा येभिरर्वतो जुनीमसि ।

9.079.02c तिरो मर्तस्य कस्य चित्परिह्वृतिं वयं धनानि विश्वधा भरेमहि ॥

9.079.03a उत स्वस्या अरात्या अरिर्हि ष उतान्यस्या अरात्या वृको हि षः ।

9.079.03c धन्वन्न तृष्णा समरीत ताँ अभि सोम जहि पवमान दुराध्यः ॥

9.079.04a दिवि ते नाभा परमो य आददे पृथिव्यास्ते रुरुहुः सानवि क्षिपः ।

9.079.04c अद्रयस्त्वा बप्सति गोरधि त्वच्य१प्सु त्वा हस्तैर्दुदुहुर्मनीषिणः ॥

9.079.05a एवा त इन्दो सुभ्वं सुपेशसं रसं तुञ्जन्ति प्रथमा अभिश्रियः ।

9.079.05c निदंनिदं पवमान नि तारिष आविस्ते शुष्मो भवतु प्रियो मदः ॥

9.080.01a सोमस्य धारा पवते नृचक्षस ऋतेन देवान्हवते दिवस्परि ।

9.080.01c बृहस्पते रवथेना वि दिद्युते समुद्रासो न सवनानि विव्यचुः ॥

9.080.02a यं त्वा वाजिन्नघ्न्या अभ्यनूषतायोहतं योनिमा रोहसि द्युमान् ।

9.080.02c मघोनामायुः प्रतिरन्महि श्रव इन्द्राय सोम पवसे वृषा मदः ॥

9.080.03a एन्द्रस्य कुक्षा पवते मदिन्तम ऊर्जं वसानः श्रवसे सुमङ्गलः ।

9.080.03c प्रत्यङ्स विश्वा भुवनाभि पप्रथे क्रीळन्हरिरत्यः स्यन्दते वृषा ॥

9.080.04a तं त्वा देवेभ्यो मधुमत्तमं नरः सहस्रधारं दुहते दश क्षिपः ।

9.080.04c नृभिः सोम प्रच्युतो ग्रावभिः सुतो विश्वान्देवाँ आ पवस्वा सहस्रजित् ॥

9.080.05a तं त्वा हस्तिनो मधुमन्तमद्रिभिर्दुहन्त्यप्सु वृषभं दश क्षिपः ।

9.080.05c इन्द्रं सोम मादयन्दैव्यं जनं सिन्धोरिवोर्मिः पवमानो अर्षसि ॥

9.081.01a प्र सोमस्य पवमानस्योर्मय इन्द्रस्य यन्ति जठरं सुपेशसः ।

9.081.01c दध्ना यदीमुन्नीता यशसा गवां दानाय शूरमुदमन्दिषुः सुताः ॥

9.081.02a अच्छा हि सोमः कलशाँ असिष्यददत्यो न वोळ्हा रघुवर्तनिर्वृषा ।

9.081.02c अथा देवानामुभयस्य जन्मनो विद्वाँ अश्नोत्यमुत इतश्च यत् ॥

9.081.03a आ नः सोम पवमानः किरा वस्विन्दो भव मघवा राधसो महः ।

9.081.03c शिक्षा वयोधो वसवे सु चेतुना मा नो गयमारे अस्मत्परा सिचः ॥

9.081.04a आ नः पूषा पवमानः सुरातयो मित्रो गच्छन्तु वरुणः सजोषसः ।

9.081.04c बृहस्पतिर्मरुतो वायुरश्विना त्वष्टा सविता सुयमा सरस्वती ॥

9.081.05a उभे द्यावापृथिवी विश्वमिन्वे अर्यमा देवो अदितिर्विधाता ।

9.081.05c भगो नृशंस उर्व१न्तरिक्षं विश्वे देवाः पवमानं जुषन्त ॥

9.082.01a असावि सोमो अरुषो वृषा हरी राजेव दस्मो अभि गा अचिक्रदत् ।

9.082.01c पुनानो वारं पर्येत्यव्ययं श्येनो न योनिं घृतवन्तमासदम् ॥

9.082.02a कविर्वेधस्या पर्येषि माहिनमत्यो न मृष्टो अभि वाजमर्षसि ।

9.082.02c अपसेधन्दुरिता सोम मृळय घृतं वसानः परि यासि निर्णिजम् ॥

9.082.03a पर्जन्यः पिता महिषस्य पर्णिनो नाभा पृथिव्या गिरिषु क्षयं दधे ।

9.082.03c स्वसार आपो अभि गा उतासरन्सं ग्रावभिर्नसते वीते अध्वरे ॥

9.082.04a जायेव पत्यावधि शेव मंहसे पज्राया गर्भ शृणुहि ब्रवीमि ते ।

9.082.04c अन्तर्वाणीषु प्र चरा सु जीवसेऽनिन्द्यो वृजने सोम जागृहि ॥

9.082.05a यथा पूर्वेभ्यः शतसा अमृध्रः सहस्रसाः पर्यया वाजमिन्दो ।

9.082.05c एवा पवस्व सुविताय नव्यसे तव व्रतमन्वापः सचन्ते ॥

9.083.01a पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।

9.083.01c अतप्ततनूर्न तदामो अश्नुते शृतास इद्वहन्तस्तत्समाशत ॥

9.083.02a तपोष्पवित्रं विततं दिवस्पदे शोचन्तो अस्य तन्तवो व्यस्थिरन् ।

9.083.02c अवन्त्यस्य पवीतारमाशवो दिवस्पृष्ठमधि तिष्ठन्ति चेतसा ॥

9.083.03a अरूरुचदुषसः पृश्निरग्रिय उक्षा बिभर्ति भुवनानि वाजयुः ।

9.083.03c मायाविनो ममिरे अस्य मायया नृचक्षसः पितरो गर्भमा दधुः ॥

9.083.04a गन्धर्व इत्था पदमस्य रक्षति पाति देवानां जनिमान्यद्भुतः ।

9.083.04c गृभ्णाति रिपुं निधया निधापतिः सुकृत्तमा मधुनो भक्षमाशत ॥

9.083.05a हविर्हविष्मो महि सद्म दैव्यं नभो वसानः परि यास्यध्वरम् ।

9.083.05c राजा पवित्ररथो वाजमारुहः सहस्रभृष्टिर्जयसि श्रवो बृहत् ॥

9.084.01a पवस्व देवमादनो विचर्षणिरप्सा इन्द्राय वरुणाय वायवे ।

9.084.01c कृधी नो अद्य वरिवः स्वस्तिमदुरुक्षितौ गृणीहि दैव्यं जनम् ॥

9.084.02a आ यस्तस्थौ भुवनान्यमर्त्यो विश्वानि सोमः परि तान्यर्षति ।

9.084.02c कृण्वन्संचृतं विचृतमभिष्टय इन्दुः सिषक्त्युषसं न सूर्यः ॥

9.084.03a आ यो गोभिः सृज्यत ओषधीष्वा देवानां सुम्न इषयन्नुपावसुः ।

9.084.03c आ विद्युता पवते धारया सुत इन्द्रं सोमो मादयन्दैव्यं जनम् ॥

9.084.04a एष स्य सोमः पवते सहस्रजिद्धिन्वानो वाचमिषिरामुषर्बुधम् ।

9.084.04c इन्दुः समुद्रमुदियर्ति वायुभिरेन्द्रस्य हार्दि कलशेषु सीदति ॥

9.084.05a अभि त्यं गावः पयसा पयोवृधं सोमं श्रीणन्ति मतिभिः स्वर्विदम् ।

9.084.05c धनंजयः पवते कृत्व्यो रसो विप्रः कविः काव्येना स्वर्चनाः ॥

9.085.01a इन्द्राय सोम सुषुतः परि स्रवापामीवा भवतु रक्षसा सह ।

9.085.01c मा ते रसस्य मत्सत द्वयाविनो द्रविणस्वन्त इह सन्त्विन्दवः ॥

9.085.02a अस्मान्समर्ये पवमान चोदय दक्षो देवानामसि हि प्रियो मदः ।

9.085.02c जहि शत्रूँरभ्या भन्दनायतः पिबेन्द्र सोममव नो मृधो जहि ॥

9.085.03a अदब्ध इन्दो पवसे मदिन्तम आत्मेन्द्रस्य भवसि धासिरुत्तमः ।

9.085.03c अभि स्वरन्ति बहवो मनीषिणो राजानमस्य भुवनस्य निंसते ॥

9.085.04a सहस्रणीथः शतधारो अद्भुत इन्द्रायेन्दुः पवते काम्यं मधु ।

9.085.04c जयन्क्षेत्रमभ्यर्षा जयन्नप उरुं नो गातुं कृणु सोम मीढ्वः ॥

9.085.05a कनिक्रदत्कलशे गोभिरज्यसे व्य१व्ययं समया वारमर्षसि ।

9.085.05c मर्मृज्यमानो अत्यो न सानसिरिन्द्रस्य सोम जठरे समक्षरः ॥

9.085.06a स्वादुः पवस्व दिव्याय जन्मने स्वादुरिन्द्राय सुहवीतुनाम्ने ।

9.085.06c स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमाँ अदाभ्यः ॥

9.085.07a अत्यं मृजन्ति कलशे दश क्षिपः प्र विप्राणां मतयो वाच ईरते ।

9.085.07c पवमाना अभ्यर्षन्ति सुष्टुतिमेन्द्रं विशन्ति मदिरास इन्दवः ॥

9.085.08a पवमानो अभ्यर्षा सुवीर्यमुर्वीं गव्यूतिं महि शर्म सप्रथः ।

9.085.08c माकिर्नो अस्य परिषूतिरीशतेन्दो जयेम त्वया धनंधनम् ॥

9.085.09a अधि द्यामस्थाद्वृषभो विचक्षणोऽरूरुचद्वि दिवो रोचना कविः ।

9.085.09c राजा पवित्रमत्येति रोरुवद्दिवः पीयूषं दुहते नृचक्षसः ॥

9.085.10a दिवो नाके मधुजिह्वा असश्चतो वेना दुहन्त्युक्षणं गिरिष्ठाम् ।

9.085.10c अप्सु द्रप्सं वावृधानं समुद्र आ सिन्धोरूर्मा मधुमन्तं पवित्र आ ॥

9.085.11a नाके सुपर्णमुपपप्तिवांसं गिरो वेनानामकृपन्त पूर्वीः ।

9.085.11c शिशुं रिहन्ति मतयः पनिप्नतं हिरण्ययं शकुनं क्षामणि स्थाम् ॥

9.085.12a ऊर्ध्वो गन्धर्वो अधि नाके अस्थाद्विश्वा रूपा प्रतिचक्षाणो अस्य ।

9.085.12c भानुः शुक्रेण शोचिषा व्यद्यौत्प्रारूरुचद्रोदसी मातरा शुचिः ॥

9.086.01a प्र त आशवः पवमान धीजवो मदा अर्षन्ति रघुजा इव त्मना ।

9.086.01c दिव्याः सुपर्णा मधुमन्त इन्दवो मदिन्तमासः परि कोशमासते ॥

9.086.02a प्र ते मदासो मदिरास आशवोऽसृक्षत रथ्यासो यथा पृथक् ।

9.086.02c धेनुर्न वत्सं पयसाभि वज्रिणमिन्द्रमिन्दवो मधुमन्त ऊर्मयः ॥

9.086.03a अत्यो न हियानो अभि वाजमर्ष स्वर्वित्कोशं दिवो अद्रिमातरम् ।

9.086.03c वृषा पवित्रे अधि सानो अव्यये सोमः पुनान इन्द्रियाय धायसे ॥

9.086.04a प्र त आश्विनीः पवमान धीजुवो दिव्या असृग्रन्पयसा धरीमणि ।

9.086.04c प्रान्तरृषय स्थाविरीरसृक्षत ये त्वा मृजन्त्यृषिषाण वेधसः ॥

9.086.05a विश्वा धामानि विश्वचक्ष ऋभ्वसः प्रभोस्ते सतः परि यन्ति केतवः ।

9.086.05c व्यानशिः पवसे सोम धर्मभिः पतिर्विश्वस्य भुवनस्य राजसि ॥

9.086.06a उभयतः पवमानस्य रश्मयो ध्रुवस्य सतः परि यन्ति केतवः ।

9.086.06c यदी पवित्रे अधि मृज्यते हरिः सत्ता नि योना कलशेषु सीदति ॥

9.086.07a यज्ञस्य केतुः पवते स्वध्वरः सोमो देवानामुप याति निष्कृतम् ।

9.086.07c सहस्रधारः परि कोशमर्षति वृषा पवित्रमत्येति रोरुवत् ॥

9.086.08a राजा समुद्रं नद्यो३ वि गाहतेऽपामूर्मिं सचते सिन्धुषु श्रितः ।

9.086.08c अध्यस्थात्सानु पवमानो अव्ययं नाभा पृथिव्या धरुणो महो दिवः ॥

9.086.09a दिवो न सानु स्तनयन्नचिक्रदद्द्यौश्च यस्य पृथिवी च धर्मभिः ।

9.086.09c इन्द्रस्य सख्यं पवते विवेविदत्सोमः पुनानः कलशेषु सीदति ॥

9.086.10a ज्योतिर्यज्ञस्य पवते मधु प्रियं पिता देवानां जनिता विभूवसुः ।

9.086.10c दधाति रत्नं स्वधयोरपीच्यं मदिन्तमो मत्सर इन्द्रियो रसः ॥

9.086.11a अभिक्रन्दन्कलशं वाज्यर्षति पतिर्दिवः शतधारो विचक्षणः ।

9.086.11c हरिर्मित्रस्य सदनेषु सीदति मर्मृजानोऽविभिः सिन्धुभिर्वृषा ॥

9.086.12a अग्रे सिन्धूनां पवमानो अर्षत्यग्रे वाचो अग्रियो गोषु गच्छति ।

9.086.12c अग्रे वाजस्य भजते महाधनं स्वायुधः सोतृभिः पूयते वृषा ॥

9.086.13a अयं मतवाञ्छकुनो यथा हितोऽव्ये ससार पवमान ऊर्मिणा ।

9.086.13c तव क्रत्वा रोदसी अन्तरा कवे शुचिर्धिया पवते सोम इन्द्र ते ॥

9.086.14a द्रापिं वसानो यजतो दिविस्पृशमन्तरिक्षप्रा भुवनेष्वर्पितः ।

9.086.14c स्वर्जज्ञानो नभसाभ्यक्रमीत्प्रत्नमस्य पितरमा विवासति ॥

9.086.15a सो अस्य विशे महि शर्म यच्छति यो अस्य धाम प्रथमं व्यानशे ।

9.086.15c पदं यदस्य परमे व्योमन्यतो विश्वा अभि सं याति संयतः ॥

9.086.16a प्रो अयासीदिन्दुरिन्द्रस्य निष्कृतं सखा सख्युर्न प्र मिनाति संगिरम् ।

9.086.16c मर्य इव युवतिभिः समर्षति सोमः कलशे शतयाम्ना पथा ॥

9.086.17a प्र वो धियो मन्द्रयुवो विपन्युवः पनस्युवः संवसनेष्वक्रमुः ।

9.086.17c सोमं मनीषा अभ्यनूषत स्तुभोऽभि धेनवः पयसेमशिश्रयुः ॥

9.086.18a आ नः सोम संयतं पिप्युषीमिषमिन्दो पवस्व पवमानो अस्रिधम् ।

9.086.18c या नो दोहते त्रिरहन्नसश्चुषी क्षुमद्वाजवन्मधुमत्सुवीर्यम् ॥

9.086.19a वृषा मतीनां पवते विचक्षणः सोमो अह्नः प्रतरीतोषसो दिवः ।

9.086.19c क्राणा सिन्धूनां कलशाँ अवीवशदिन्द्रस्य हार्द्याविशन्मनीषिभिः ॥

9.086.20a मनीषिभिः पवते पूर्व्यः कविर्नृभिर्यतः परि कोशाँ अचिक्रदत् ।

9.086.20c त्रितस्य नाम जनयन्मधु क्षरदिन्द्रस्य वायोः सख्याय कर्तवे ॥

9.086.21a अयं पुनान उषसो वि रोचयदयं सिन्धुभ्यो अभवदु लोककृत् ।

9.086.21c अयं त्रिः सप्त दुदुहान आशिरं सोमो हृदे पवते चारु मत्सरः ॥

9.086.22a पवस्व सोम दिव्येषु धामसु सृजान इन्दो कलशे पवित्र आ ।

9.086.22c सीदन्निन्द्रस्य जठरे कनिक्रदन्नृभिर्यतः सूर्यमारोहयो दिवि ॥

9.086.23a अद्रिभिः सुतः पवसे पवित्र आँ इन्दविन्द्रस्य जठरेष्वाविशन् ।

9.086.23c त्वं नृचक्षा अभवो विचक्षण सोम गोत्रमङ्गिरोभ्योऽवृणोरप ॥

9.086.24a त्वां सोम पवमानं स्वाध्योऽनु विप्रासो अमदन्नवस्यवः ।

9.086.24c त्वां सुपर्ण आभरद्दिवस्परीन्दो विश्वाभिर्मतिभिः परिष्कृतम् ॥

9.086.25a अव्ये पुनानं परि वार ऊर्मिणा हरिं नवन्ते अभि सप्त धेनवः ।

9.086.25c अपामुपस्थे अध्यायवः कविमृतस्य योना महिषा अहेषत ॥

9.086.26a इन्दुः पुनानो अति गाहते मृधो विश्वानि कृण्वन्सुपथानि यज्यवे ।

9.086.26c गाः कृण्वानो निर्णिजं हर्यतः कविरत्यो न क्रीळन्परि वारमर्षति ॥

9.086.27a असश्चतः शतधारा अभिश्रियो हरिं नवन्तेऽव ता उदन्युवः ।

9.086.27c क्षिपो मृजन्ति परि गोभिरावृतं तृतीये पृष्ठे अधि रोचने दिवः ॥

9.086.28a तवेमाः प्रजा दिव्यस्य रेतसस्त्वं विश्वस्य भुवनस्य राजसि ।

9.086.28c अथेदं विश्वं पवमान ते वशे त्वमिन्दो प्रथमो धामधा असि ॥

9.086.29a त्वं समुद्रो असि विश्ववित्कवे तवेमाः पञ्च प्रदिशो विधर्मणि ।

9.086.29c त्वं द्यां च पृथिवीं चाति जभ्रिषे तव ज्योतींषि पवमान सूर्यः ॥

9.086.30a त्वं पवित्रे रजसो विधर्मणि देवेभ्यः सोम पवमान पूयसे ।

9.086.30c त्वामुशिजः प्रथमा अगृभ्णत तुभ्येमा विश्वा भुवनानि येमिरे ॥

9.086.31a प्र रेभ एत्यति वारमव्ययं वृषा वनेष्वव चक्रदद्धरिः ।

9.086.31c सं धीतयो वावशाना अनूषत शिशुं रिहन्ति मतयः पनिप्नतम् ॥

9.086.32a स सूर्यस्य रश्मिभिः परि व्यत तन्तुं तन्वानस्त्रिवृतं यथा विदे ।

9.086.32c नयन्नृतस्य प्रशिषो नवीयसीः पतिर्जनीनामुप याति निष्कृतम् ॥

9.086.33a राजा सिन्धूनां पवते पतिर्दिव ऋतस्य याति पथिभिः कनिक्रदत् ।

9.086.33c सहस्रधारः परि षिच्यते हरिः पुनानो वाचं जनयन्नुपावसुः ॥

9.086.34a पवमान मह्यर्णो वि धावसि सूरो न चित्रो अव्ययानि पव्यया ।

9.086.34c गभस्तिपूतो नृभिरद्रिभिः सुतो महे वाजाय धन्याय धन्वसि ॥

9.086.35a इषमूर्जं पवमानाभ्यर्षसि श्येनो न वंसु कलशेषु सीदसि ।

9.086.35c इन्द्राय मद्वा मद्यो मदः सुतो दिवो विष्टम्भ उपमो विचक्षणः ॥

9.086.36a सप्त स्वसारो अभि मातरः शिशुं नवं जज्ञानं जेन्यं विपश्चितम् ।

9.086.36c अपां गन्धर्वं दिव्यं नृचक्षसं सोमं विश्वस्य भुवनस्य राजसे ॥

9.086.37a ईशान इमा भुवनानि वीयसे युजान इन्दो हरितः सुपर्ण्यः ।

9.086.37c तास्ते क्षरन्तु मधुमद्घृतं पयस्तव व्रते सोम तिष्ठन्तु कृष्टयः ॥

9.086.38a त्वं नृचक्षा असि सोम विश्वतः पवमान वृषभ ता वि धावसि ।

9.086.38c स नः पवस्व वसुमद्धिरण्यवद्वयं स्याम भुवनेषु जीवसे ॥

9.086.39a गोवित्पवस्व वसुविद्धिरण्यविद्रेतोधा इन्दो भुवनेष्वर्पितः ।

9.086.39c त्वं सुवीरो असि सोम विश्ववित्तं त्वा विप्रा उप गिरेम आसते ॥

9.086.40a उन्मध्व ऊर्मिर्वनना अतिष्ठिपदपो वसानो महिषो वि गाहते ।

9.086.40c राजा पवित्ररथो वाजमारुहत्सहस्रभृष्टिर्जयति श्रवो बृहत् ॥

9.086.41a स भन्दना उदियर्ति प्रजावतीर्विश्वायुर्विश्वाः सुभरा अहर्दिवि ।

9.086.41c ब्रह्म प्रजावद्रयिमश्वपस्त्यं पीत इन्दविन्द्रमस्मभ्यं याचतात् ॥

9.086.42a सो अग्रे अह्नां हरिर्हर्यतो मदः प्र चेतसा चेतयते अनु द्युभिः ।

9.086.42c द्वा जना यातयन्नन्तरीयते नरा च शंसं दैव्यं च धर्तरि ॥

9.086.43a अञ्जते व्यञ्जते समञ्जते क्रतुं रिहन्ति मधुनाभ्यञ्जते ।

9.086.43c सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमासु गृभ्णते ॥

9.086.44a विपश्चिते पवमानाय गायत मही न धारात्यन्धो अर्षति ।

9.086.44c अहिर्न जूर्णामति सर्पति त्वचमत्यो न क्रीळन्नसरद्वृषा हरिः ॥

9.086.45a अग्रेगो राजाप्यस्तविष्यते विमानो अह्नां भुवनेष्वर्पितः ।

9.086.45c हरिर्घृतस्नुः सुदृशीको अर्णवो ज्योतीरथः पवते राय ओक्यः ॥

9.086.46a असर्जि स्कम्भो दिव उद्यतो मदः परि त्रिधातुर्भुवनान्यर्षति ।

9.086.46c अंशुं रिहन्ति मतयः पनिप्नतं गिरा यदि निर्णिजमृग्मिणो ययुः ॥

9.086.47a प्र ते धारा अत्यण्वानि मेष्यः पुनानस्य संयतो यन्ति रंहयः ।

9.086.47c यद्गोभिरिन्दो चम्वोः समज्यस आ सुवानः सोम कलशेषु सीदसि ॥

9.086.48a पवस्व सोम क्रतुविन्न उक्थ्योऽव्यो वारे परि धाव मधु प्रियम् ।

9.086.48c जहि विश्वान्रक्षस इन्दो अत्रिणो बृहद्वदेम विदथे सुवीराः ॥

9.087.01a प्र तु द्रव परि कोशं नि षीद नृभिः पुनानो अभि वाजमर्ष ।

9.087.01c अश्वं न त्वा वाजिनं मर्जयन्तोऽच्छा बर्ही रशनाभिर्नयन्ति ॥

9.087.02a स्वायुधः पवते देव इन्दुरशस्तिहा वृजनं रक्षमाणः ।

9.087.02c पिता देवानां जनिता सुदक्षो विष्टम्भो दिवो धरुणः पृथिव्याः ॥

9.087.03a ऋषिर्विप्रः पुरएता जनानामृभुर्धीर उशना काव्येन ।

9.087.03c स चिद्विवेद निहितं यदासामपीच्यं१ गुह्यं नाम गोनाम् ॥

9.087.04a एष स्य ते मधुमाँ इन्द्र सोमो वृषा वृष्णे परि पवित्रे अक्षाः ।

9.087.04c सहस्रसाः शतसा भूरिदावा शश्वत्तमं बर्हिरा वाज्यस्थात् ॥

9.087.05a एते सोमा अभि गव्या सहस्रा महे वाजायामृताय श्रवांसि ।

9.087.05c पवित्रेभिः पवमाना असृग्रञ्छ्रवस्यवो न पृतनाजो अत्याः ॥

9.087.06a परि हि ष्मा पुरुहूतो जनानां विश्वासरद्भोजना पूयमानः ।

9.087.06c अथा भर श्येनभृत प्रयांसि रयिं तुञ्जानो अभि वाजमर्ष ॥

9.087.07a एष सुवानः परि सोमः पवित्रे सर्गो न सृष्टो अदधावदर्वा ।

9.087.07c तिग्मे शिशानो महिषो न शृङ्गे गा गव्यन्नभि शूरो न सत्वा ॥

9.087.08a एषा ययौ परमादन्तरद्रेः कूचित्सतीरूर्वे गा विवेद ।

9.087.08c दिवो न विद्युत्स्तनयन्त्यभ्रैः सोमस्य ते पवत इन्द्र धारा ॥

9.087.09a उत स्म राशिं परि यासि गोनामिन्द्रेण सोम सरथं पुनानः ।

9.087.09c पूर्वीरिषो बृहतीर्जीरदानो शिक्षा शचीवस्तव ता उपष्टुत् ॥

9.088.01a अयं सोम इन्द्र तुभ्यं सुन्वे तुभ्यं पवते त्वमस्य पाहि ।
9.088.01c त्वं ह यं चकृषे त्वं ववृष इन्दुं मदाय युज्याय सोमम् ॥
9.088.02a स ईं रथो न भुरिषाळयोजि महः पुरूणि सातये वसूनि ।
9.088.02c आदीं विश्वा नहुष्याणि जाता स्वर्षाता वन ऊर्ध्वा नवन्त ॥
9.088.03a वायुर्न यो नियुत्वाँ इष्टयामा नासत्येव हव आ शम्भविष्ठः ।
9.088.03c विश्ववारो द्रविणोदा इव त्मन्पूषेव धीजवनोऽसि सोम ॥
9.088.04a इन्द्रो न यो महा कर्माणि चक्रिर्हन्ता वृत्राणामसि सोम पूर्भित् ।
9.088.04c पैद्वो न हि त्वमहिनाम्नां हन्ता विश्वस्यासि सोम दस्योः ॥
9.088.05a अग्निर्न यो वन आ सृज्यमानो वृथा पाजांसि कृणुते नदीषु ।
9.088.05c जनो न युध्वा महत उपब्दिरियर्ति सोमः पवमान ऊर्मिम् ॥
9.088.06a एते सोमा अति वाराण्यव्या दिव्या न कोशासो अभ्रवर्षाः ।
9.088.06c वृथा समुद्रं सिन्धवो न नीचीः सुतासो अभि कलशाँ असृग्रन् ॥
9.088.07a शुष्मी शर्धो न मारुतं पवस्वानभिशस्ता दिव्या यथा विट् ।
9.088.07c आपो न मक्षू सुमतिर्भवा नः सहस्राप्साः पृतनाषाण्न यज्ञः ॥
9.088.08a राज्ञो नु ते वरुणस्य व्रतानि बृहद्गभीरं तव सोम धाम ।
9.088.08c शुचिष्ट्वमसि प्रियो न मित्रो दक्षाय्यो अर्यमेवासि सोम ॥

9.089.01a प्रो स्य वह्निः पथ्याभिरस्यान्दिवो न वृष्टिः पवमानो अक्षाः ।

9.089.01c सहस्रधारो असदन्न्यस्मे मातुरुपस्थे वन आ च सोमः ॥

9.089.02a राजा सिन्धूनामवसिष्ट वास ऋतस्य नावमारुहद्रजिष्ठाम् ।

9.089.02c अप्सु द्रप्सो वावृधे श्येनजूतो दुह ईं पिता दुह ईं पितुर्जाम् ॥

9.089.03a सिंहं नसन्त मध्वो अयासं हरिमरुषं दिवो अस्य पतिम् ।

9.089.03c शूरो युत्सु प्रथमः पृच्छते गा अस्य चक्षसा परि पात्युक्षा ॥

9.089.04a मधुपृष्ठं घोरमयासमश्वं रथे युञ्जन्त्युरुचक्र ऋष्वम् ।

9.089.04c स्वसार ईं जामयो मर्जयन्ति सनाभयो वाजिनमूर्जयन्ति ॥

9.089.05a चतस्र ईं घृतदुहः सचन्ते समाने अन्तर्धरुणे निषत्ताः ।

9.089.05c ता ईमर्षन्ति नमसा पुनानास्ता ईं विश्वतः परि षन्ति पूर्वीः ॥

9.089.06a विष्टम्भो दिवो धरुणः पृथिव्या विश्वा उत क्षितयो हस्ते अस्य ।

9.089.06c असत्त उत्सो गृणते नियुत्वान्मध्वो अंशुः पवत इन्द्रियाय ॥

9.089.07a वन्वन्नवातो अभि देववीतिमिन्द्राय सोम वृत्रहा पवस्व ।

9.089.07c शग्धि महः पुरुश्चन्द्रस्य रायः सुवीर्यस्य पतयः स्याम ॥

9.090.01a प्र हिन्वानो जनिता रोदस्यो रथो न वाजं सनिष्यन्नयासीत् ।

9.090.01c इन्द्रं गच्छन्नायुधा संशिशानो विश्वा वसु हस्तयोरादधानः ॥

9.090.02a अभि त्रिपृष्ठं वृषणं वयोधामाङ्गूषाणामवावशन्त वाणीः ।

9.090.02c वना वसानो वरुणो न सिन्धून्वि रत्नधा दयते वार्याणि ॥

9.090.03a शूरग्रामः सर्ववीरः सहावाञ्जेता पवस्व सनिता धनानि ।

9.090.03c तिग्मायुधः क्षिप्रधन्वा समत्स्वषाळ्हः साह्वान्पृतनासु शत्रून् ॥

9.090.04a उरुगव्यूतिरभयानि कृण्वन्समीचीने आ पवस्वा पुरंधी ।

9.090.04c अपः सिषासन्नुषसः स्वर्गाः सं चिक्रदो महो अस्मभ्यं वाजान् ॥

9.090.05a मत्सि सोम वरुणं मत्सि मित्रं मत्सीन्द्रमिन्दो पवमान विष्णुम् ।

9.090.05c मत्सि शर्धो मारुतं मत्सि देवान्मत्सि महामिन्द्रमिन्दो मदाय ॥

9.090.06a एवा राजेव क्रतुमाँ अमेन विश्वा घनिघ्नद्दुरिता पवस्व ।

9.090.06c इन्दो सूक्ताय वचसे वयो धा यूयं पात स्वस्तिभिः सदा नः ॥

9.091.01a असर्जि वक्वा रथ्ये यथाजौ धिया मनोता प्रथमो मनीषी ।

9.091.01c दश स्वसारो अधि सानो अव्येऽजन्ति वह्निं सदनान्यच्छ ॥

9.091.02a वीती जनस्य दिव्यस्य कव्यैरधि सुवानो नहुष्येभिरिन्दुः ।

9.091.02c प्र यो नृभिरमृतो मर्त्येभिर्मर्मृजानोऽविभिर्गोभिरद्भिः ॥

9.091.03a वृषा वृष्णे रोरुवदंशुरस्मै पवमानो रुशदीर्ते पयो गोः ।

9.091.03c सहस्रमृक्वा पथिभिर्वचोविदध्वस्मभिः सूरो अण्वं वि याति ॥

9.091.04a रुजा दृळ्हा चिद्रक्षसः सदांसि पुनान इन्द ऊर्णुहि वि वाजान् ।

9.091.04c वृश्चोपरिष्टात्तुजता वधेन ये अन्ति दूरादुपनायमेषाम् ॥

9.091.05a स प्रत्नवन्नव्यसे विश्ववार सूक्ताय पथः कृणुहि प्राचः ।

9.091.05c ये दुःषहासो वनुषा बृहन्तस्ताँस्ते अश्याम पुरुकृत्पुरुक्षो ॥

9.091.06a एवा पुनानो अपः स्वर्गा अस्मभ्यं तोका तनयानि भूरि ।

9.091.06c शं नः क्षेत्रमुरु ज्योतींषि सोम ज्योङ्नः सूर्यं दृशये रिरीहि ॥

9.092.01a परि सुवानो हरिरंशुः पवित्रे रथो न सर्जि सनये हियानः ।

9.092.01c आपच्छ्लोकमिन्द्रियं पूयमानः प्रति देवाँ अजुषत प्रयोभिः ॥

9.092.02a अच्छा नृचक्षा असरत्पवित्रे नाम दधानः कविरस्य योनौ ।

9.092.02c सीदन्होतेव सदने चमूषूपेमग्मन्नृषयः सप्त विप्राः ॥

9.092.03a प्र सुमेधा गातुविद्विश्वदेवः सोमः पुनानः सद एति नित्यम् ।

9.092.03c भुवद्विश्वेषु काव्येषु रन्तानु जनान्यतते पञ्च धीरः ॥

9.092.04a तव त्ये सोम पवमान निण्ये विश्वे देवास्त्रय एकादशासः ।

9.092.04c दश स्वधाभिरधि सानो अव्ये मृजन्ति त्वा नद्यः सप्त यह्वीः ॥

9.092.05a तन्नु सत्यं पवमानस्यास्तु यत्र विश्वे कारवः संनसन्त ।

9.092.05c ज्योतिर्यदह्ने अकृणोदु लोकं प्रावन्मनुं दस्यवे करभीकम् ॥

9.092.06a परि सद्मेव पशुमान्ति होता राजा न सत्यः समितीरियानः ।

9.092.06c सोमः पुनानः कलशाँ अयासीत्सीदन्मृगो न महिषो वनेषु ॥

9.093.01a साकमुक्षो मर्जयन्त स्वसारो दश धीरस्य धीतयो धनुत्रीः ।

9.093.01c हरिः पर्यद्रवज्जाः सूर्यस्य द्रोणं ननक्षे अत्यो न वाजी ॥

9.093.02a सं मातृभिर्न शिशुर्वावशानो वृषा दधन्वे पुरुवारो अद्भिः ।

9.093.02c मर्यो न योषामभि निष्कृतं यन्सं गच्छते कलश उस्रियाभिः ॥

9.093.03a उत प्र पिप्य ऊधरघ्न्याया इन्दुर्धाराभिः सचते सुमेधाः ।

9.093.03c मूर्धानं गावः पयसा चमूष्वभि श्रीणन्ति वसुभिर्न निक्तैः ॥

9.093.04a स नो देवेभिः पवमान रदेन्दो रयिमश्विनं वावशानः ।

9.093.04c रथिरायतामुशती पुरंधिरस्मद्र्य१गा दावने वसूनाम् ॥

9.093.05a नू नो रयिमुप मास्व नृवन्तं पुनानो वाताप्यं विश्वश्चन्द्रम् ।

9.093.05c प्र वन्दितुरिन्दो तार्यायुः प्रातर्मक्षू धियावसुर्जगम्यात् ॥

9.094.01a अधि यदस्मिन्वाजिनीव शुभ स्पर्धन्ते धियः सूर्ये न विशः ।

9.094.01c अपो वृणानः पवते कवीयन्व्रजं न पशुवर्धनाय मन्म ॥

9.094.02a द्विता व्यूर्ण्वन्नमृतस्य धाम स्वर्विदे भुवनानि प्रथन्त ।

9.094.02c धियः पिन्वानाः स्वसरे न गाव ऋतायन्तीरभि वावश्र इन्दुम् ॥

9.094.03a परि यत्कविः काव्या भरते शूरो न रथो भुवनानि विश्वा ।

9.094.03c देवेषु यशो मर्ताय भूषन्दक्षाय रायः पुरुभूषु नव्यः ॥

9.094.04a श्रिये जातः श्रिय आ निरियाय श्रियं वयो जरितृभ्यो दधाति ।

9.094.04c श्रियं वसाना अमृतत्वमायन्भवन्ति सत्या समिथा मितद्रौ ॥

9.094.05a इषमूर्जमभ्यर्षाश्वं गामुरु ज्योतिः कृणुहि मत्सि देवान् ।

9.094.05c विश्वानि हि सुषहा तानि तुभ्यं पवमान बाधसे सोम शत्रून् ॥

9.095.01a कनिक्रन्ति हरिरा सृज्यमानः सीदन्वनस्य जठरे पुनानः ।

9.095.01c नृभिर्यतः कृणुते निर्णिजं गा अतो मतीर्जनयत स्वधाभिः ॥

9.095.02a हरिः सृजानः पथ्यामृतस्येयर्ति वाचमरितेव नावम् ।

9.095.02c देवो देवानां गुह्यानि नामाविष्कृणोति बर्हिषि प्रवाचे ॥

9.095.03a अपामिवेदूर्मयस्तर्तुराणाः प्र मनीषा ईरते सोममच्छ ।

9.095.03c नमस्यन्तीरुप च यन्ति सं चा च विशन्त्युशतीरुशन्तम् ॥

9.095.04a तं मर्मृजानं महिषं न सानावंशुं दुहन्त्युक्षणं गिरिष्ठाम् ।

9.095.04c तं वावशानं मतयः सचन्ते त्रितो बिभर्ति वरुणं समुद्रे ॥

9.095.05a इष्यन्वाचमुपवक्तेव होतुः पुनान इन्दो वि ष्या मनीषाम् ।

9.095.05c इन्द्रश्च यत्क्षयथः सौभगाय सुवीर्यस्य पतयः स्याम ॥

9.096.01a प्र सेनानीः शूरो अग्रे रथानां गव्यन्नेति हर्षते अस्य सेना ।

9.096.01c भद्रान्कृण्वन्निन्द्रहवान्सखिभ्य आ सोमो वस्त्रा रभसानि दत्ते ॥

9.096.02a समस्य हरिं हरयो मृजन्त्यश्वहयैरनिशितं नमोभिः ।

9.096.02c आ तिष्ठति रथमिन्द्रस्य सखा विद्वाँ एना सुमतिं यात्यच्छ ॥

9.096.03a स नो देव देवताते पवस्व महे सोम प्सरस इन्द्रपानः ।

9.096.03c कृण्वन्नपो वर्षयन्द्यामुतेमामुरोरा नो वरिवस्या पुनानः ॥

9.096.04a अजीतयेऽहतये पवस्व स्वस्तये सर्वतातये बृहते ।

9.096.04c तदुशन्ति विश्व इमे सखायस्तदहं वश्मि पवमान सोम ॥

9.096.05a सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।

9.096.05c जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥

9.096.06a ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् ।

9.096.06c श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येति रेभन् ॥

9.096.07a प्रावीविपद्वाच ऊर्मिं न सिन्धुर्गिरः सोमः पवमानो मनीषाः ।

9.096.07c अन्तः पश्यन्वृजनेमावराण्या तिष्ठति वृषभो गोषु जानन् ॥

9.096.08a स मत्सरः पृत्सु वन्वन्नवातः सहस्ररेता अभि वाजमर्ष ।

9.096.08c इन्द्रायेन्दो पवमानो मनीष्यं१शोरूर्मिमीरय गा इषण्यन् ॥

9.096.09a परि प्रियः कलशे देववात इन्द्राय सोमो रण्यो मदाय ।

9.096.09c सहस्रधारः शतवाज इन्दुर्वाजी न सप्तिः समना जिगाति ॥

9.096.10a स पूर्व्यो वसुविज्जायमानो मृजानो अप्सु दुदुहानो अद्रौ ।

9.096.10c अभिशस्तिपा भुवनस्य राजा विदद्गातुं ब्रह्मणे पूयमानः ॥

9.096.11a त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः ।

9.096.11c वन्वन्नवातः परिधीँरपोर्णु वीरेभिरश्वैर्मघवा भवा नः ॥

9.096.12a यथापवथा मनवे वयोधा अमित्रहा वरिवोविद्धविष्मान् ।

9.096.12c एवा पवस्व द्रविणं दधान इन्द्रे सं तिष्ठ जनयायुधानि ॥

9.096.13a पवस्व सोम मधुमाँ ऋतावापो वसानो अधि सानो अव्ये ।

9.096.13c अव द्रोणानि घृतवान्ति सीद मदिन्तमो मत्सर इन्द्रपानः ॥

9.096.14a वृष्टिं दिवः शतधारः पवस्व सहस्रसा वाजयुर्देववीतौ ।

9.096.14c सं सिन्धुभिः कलशे वावशानः समुस्रियाभिः प्रतिरन्न आयुः ॥

9.096.15a एष स्य सोमो मतिभिः पुनानोऽत्यो न वाजी तरतीदरातीः ।

9.096.15c पयो न दुग्धमदितेरिषिरमुर्विव गातुः सुयमो न वोळ्हा ॥

9.096.16a स्वायुधः सोतृभिः पूयमानोऽभ्यर्ष गुह्यं चारु नाम ।

9.096.16c अभि वाजं सप्तिरिव श्रवस्याभि वायुमभि गा देव सोम ॥

9.096.17a शिशुं जज्ञानं हर्यतं मृजन्ति शुम्भन्ति वह्निं मरुतो गणेन ।

9.096.17c कविर्गीर्भिः काव्येना कविः सन्सोमः पवित्रमत्येति रेभन् ॥

9.096.18a ऋषिमना य ऋषिकृत्स्वर्षाः सहस्रणीथः पदवीः कवीनाम् ।

9.096.18c तृतीयं धाम महिषः सिषासन्सोमो विराजमनु राजति ष्टुप् ॥

9.096.19a चमूषच्छ्येनः शकुनो विभृत्वा गोविन्दुर्द्रप्स आयुधानि बिभ्रत् ।

9.096.19c अपामूर्मिं सचमानः समुद्रं तुरीयं धाम महिषो विवक्ति ॥

9.096.20a मर्यो न शुभ्रस्तन्वं मृजानोऽत्यो न सृत्वा सनये धनानाम् ।

9.096.20c वृषेव यूथा परि कोशमर्षन्कनिक्रदच्चम्वो३रा विवेश ॥

9.096.21a पवस्वेन्दो पवमानो महोभिः कनिक्रदत्परि वाराण्यर्ष ।

9.096.21c क्रीळञ्चम्वो३रा विश पूयमान इन्द्रं ते रसो मदिरो ममत्तु ॥

9.096.22a प्रास्य धारा बृहतीरसृग्रन्नक्तो गोभिः कलशाँ आ विवेश ।

9.096.22c साम कृण्वन्सामन्यो विपश्चित्क्रन्दन्नेत्यभि सख्युर्न जामिम् ॥

9.096.23a अपघ्नन्नेषि पवमान शत्रून्प्रियां न जारो अभिगीत इन्दुः ।

9.096.23c सीदन्वनेषु शकुनो न पत्वा सोमः पुनानः कलशेषु सत्ता ॥

9.096.24a आ ते रुचः पवमानस्य सोम योषेव यन्ति सुदुघाः सुधाराः ।

9.096.24c हरिरानीतः पुरुवारो अप्स्वचिक्रदत्कलशे देवयूनाम् ॥

9.097.01a अस्य प्रेषा हेमना पूयमानो देवो देवेभिः समपृक्त रसम् ।

9.097.01c सुतः पवित्रं पर्येति रेभन्मितेव सद्म पशुमान्ति होता ॥

9.097.02a भद्रा वस्त्रा समन्या३ वसानो महान्कविर्निवचनानि शंसन् ।

9.097.02c आ वच्यस्व चम्वोः पूयमानो विचक्षणो जागृविर्देववीतौ ॥

9.097.03a समु प्रियो मृज्यते सानो अव्ये यशस्तरो यशसां क्षैतो अस्मे ।

9.097.03c अभि स्वर धन्वा पूयमानो यूयं पात स्वस्तिभिः सदा नः ॥

9.097.04a प्र गायताभ्यर्चाम देवान्सोमं हिनोत महते धनाय ।

9.097.04c स्वादुः पवाते अति वारमव्यमा सीदाति कलशं देवयुर्नः ॥

9.097.05a इन्दुर्देवानामुप सख्यमायन्सहस्रधारः पवते मदाय ।

9.097.05c नृभि स्तवानो अनु धाम पूर्वमगन्निन्द्रं महते सौभगाय ॥

9.097.06a स्तोत्रे राये हरिरर्षा पुनान इन्द्रं मदो गच्छतु ते भराय ।

9.097.06c देवैर्याहि सरथं राधो अच्छा यूयं पात स्वस्तिभिः सदा नः ॥

9.097.07a प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति ।

9.097.07c महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन् ॥

9.097.08a प्र हंसासस्तृपलं मन्युमच्छामादस्तं वृषगणा अयासुः ।

9.097.08c आङ्गूष्यं१ पवमानं सखायो दुर्मर्षं साकं प्र वदन्ति वाणम् ॥

9.097.09a स रंहत उरुगायस्य जूतिं वृथा क्रीळन्तं मिमते न गावः ।

9.097.09c परीणसं कृणुते तिग्मशृङ्गो दिवा हरिर्ददृशे नक्तमृज्रः ॥

9.097.10a इन्दुर्वाजी पवते गोन्योघा इन्द्रे सोमः सह इन्वन्मदाय ।

9.097.10c हन्ति रक्षो बाधते पर्यरातीर्वरिवः कृण्वन्वृजनस्य राजा ॥

9.097.11a अध धारया मध्वा पृचानस्तिरो रोम पवते अद्रिदुग्धः ।

9.097.11c इन्दुरिन्द्रस्य सख्यं जुषाणो देवो देवस्य मत्सरो मदाय ॥

9.097.12a अभि प्रियाणि पवते पुनानो देवो देवान्स्वेन रसेन पृञ्चन् ।

9.097.12c इन्दुर्धर्माण्यृतुथा वसानो दश क्षिपो अव्यत सानो अव्ये ॥

9.097.13a वृषा शोणो अभिकनिक्रदद्गा नदयन्नेति पृथिवीमुत द्याम् ।

9.097.13c इन्द्रस्येव वग्नुरा शृण्व आजौ प्रचेतयन्नर्षति वाचमेमाम् ॥

9.097.14a रसाय्यः पयसा पिन्वमान ईरयन्नेषि मधुमन्तमंशुम् ।

9.097.14c पवमानः संतनिमेषि कृण्वन्निन्द्राय सोम परिषिच्यमानः ॥

9.097.15a एवा पवस्व मदिरो मदायोदग्राभस्य नमयन्वधस्नैः ।

9.097.15c परि वर्णं भरमाणो रुशन्तं गव्युर्नो अर्ष परि सोम सिक्तः ॥

9.097.16a जुष्ट्वी न इन्दो सुपथा सुगान्युरौ पवस्व वरिवांसि कृण्वन् ।

9.097.16c घनेव विष्वग्दुरितानि विघ्नन्नधि ष्णुना धन्व सानो अव्ये ॥

9.097.17a वृष्टिं नो अर्ष दिव्यां जिगत्नुमिळावतीं शंगयीं जीरदानुम् ।

9.097.17c स्तुकेव वीता धन्वा विचिन्वन्बन्धूँरिमाँ अवराँ इन्दो वायून् ॥

9.097.18a ग्रन्थिं न वि ष्य ग्रथितं पुनान ऋजुं च गातुं वृजिनं च सोम ।

9.097.18c अत्यो न क्रदो हरिरा सृजानो मर्यो देव धन्व पस्त्यावान् ॥

9.097.19a जुष्टो मदाय देवतात इन्दो परि ष्णुना धन्व सानो अव्ये ।

9.097.19c सहस्रधारः सुरभिरदब्धः परि स्रव वाजसातौ नृषह्ये ॥

9.097.20a अरश्मानो येऽरथा अयुक्ता अत्यासो न ससृजानास आजौ ।

9.097.20c एते शुक्रासो धन्वन्ति सोमा देवासस्ताँ उप याता पिबध्यै ॥

9.097.21a एवा न इन्दो अभि देववीतिं परि स्रव नभो अर्णश्चमूषु ।

9.097.21c सोमो अस्मभ्यं काम्यं बृहन्तं रयिं ददातु वीरवन्तमुग्रम् ॥

9.097.22a तक्षद्यदी मनसो वेनतो वाग्ज्येष्ठस्य वा धर्मणि क्षोरनीके ।

9.097.22c आदीमायन्वरमा वावशाना जुष्टं पतिं कलशे गाव इन्दुम् ॥

9.097.23a प्र दानुदो दिव्यो दानुपिन्व ऋतमृताय पवते सुमेधाः ।

9.097.23c धर्मा भुवद्वृजन्यस्य राजा प्र रश्मिभिर्दशभिर्भारि भूम ॥

9.097.24a पवित्रेभिः पवमानो नृचक्षा राजा देवानामुत मर्त्यानाम् ।

9.097.24c द्विता भुवद्रयिपती रयीणामृतं भरत्सुभृतं चार्विन्दुः ॥

9.097.25a अर्वाँ इव श्रवसे सातिमच्छेन्द्रस्य वायोरभि वीतिमर्ष ।

9.097.25c स नः सहस्रा बृहतीरिषो दा भवा सोम द्रविणोवित्पुनानः ॥

9.097.26a देवाव्यो नः परिषिच्यमानाः क्षयं सुवीरं धन्वन्तु सोमाः ।

9.097.26c आयज्यवः सुमतिं विश्ववारा होतारो न दिवियजो मन्द्रतमाः ॥

9.097.27a एवा देव देवताते पवस्व महे सोम प्सरसे देवपानः ।

9.097.27c महश्चिद्धि ष्मसि हिताः समर्ये कृधि सुष्ठाने रोदसी पुनानः ॥

9.097.28a अश्वो नो क्रदो वृषभिर्युजानः सिंहो न भीमो मनसो जवीयान् ।

9.097.28c अर्वाचीनैः पथिभिर्ये रजिष्ठा आ पवस्व सौमनसं न इन्दो ॥

9.097.29a शतं धारा देवजाता असृग्रन्सहस्रमेनाः कवयो मृजन्ति ।

9.097.29c इन्दो सनित्रं दिव आ पवस्व पुरएतासि महतो धनस्य ॥

9.097.30a दिवो न सर्गा अससृग्रमह्नां राजा न मित्रं प्र मिनाति धीरः ।

9.097.30c पितुर्न पुत्रः क्रतुभिर्यतान आ पवस्व विशे अस्या अजीतिम् ॥

9.097.31a प्र ते धारा मधुमतीरसृग्रन्वारान्यत्पूतो अत्येष्यव्यान् ।

9.097.31c पवमान पवसे धाम गोनां जज्ञानः सूर्यमपिन्वो अर्कैः ॥

9.097.32a कनिक्रददनु पन्थामृतस्य शुक्रो वि भास्यमृतस्य धाम ।

9.097.32c स इन्द्राय पवसे मत्सरवान्हिन्वानो वाचं मतिभिः कवीनाम् ॥

9.097.33a दिव्यः सुपर्णोऽव चक्षि सोम पिन्वन्धाराः कर्मणा देववीतौ ।

9.097.33c एन्दो विश कलशं सोमधानं क्रन्दन्निहि सूर्यस्योप रश्मिम् ॥

9.097.34a तिस्रो वाच ईरयति प्र वह्निरृतस्य धीतिं ब्रह्मणो मनीषाम् ।

9.097.34c गावो यन्ति गोपतिं पृच्छमानाः सोमं यन्ति मतयो वावशानाः ॥

9.097.35a सोमं गावो धेनवो वावशानाः सोमं विप्रा मतिभिः पृच्छमानाः ।

9.097.35c सोमः सुतः पूयते अज्यमानः सोमे अर्कास्त्रिष्टुभः सं नवन्ते ॥

9.097.36a एवा नः सोम परिषिच्यमान आ पवस्व पूयमानः स्वस्ति ।

9.097.36c इन्द्रमा विश बृहता रवेण वर्धया वाचं जनया पुरंधिम् ॥

9.097.37a आ जागृविर्विप्र ऋता मतीनां सोमः पुनानो असदच्चमूषु ।

9.097.37c सपन्ति यं मिथुनासो निकामा अध्वर्यवो रथिरासः सुहस्ताः ॥

9.097.38a स पुनान उप सूरे न धातोभे अप्रा रोदसी वि ष आवः ।

9.097.38c प्रिया चिद्यस्य प्रियसास ऊती स तू धनं कारिणे न प्र यंसत् ॥

9.097.39a स वर्धिता वर्धनः पूयमानः सोमो मीढ्वाँ अभि नो ज्योतिषावीत् ।

9.097.39c येना नः पूर्वे पितरः पदज्ञाः स्वर्विदो अभि गा अद्रिमुष्णन् ॥

9.097.40a अक्रान्समुद्रः प्रथमे विधर्मञ्जनयन्प्रजा भुवनस्य राजा ।

9.097.40c वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे सुवान इन्दुः ॥

9.097.41a महत्तत्सोमो महिषश्चकारापां यद्गर्भोऽवृणीत देवान् ।

9.097.41c अदधादिन्द्रे पवमान ओजोऽजनयत्सूर्ये ज्योतिरिन्दुः ॥

9.097.42a मत्सि वायुमिष्टये राधसे च मत्सि मित्रावरुणा पूयमानः ।

9.097.42c मत्सि शर्धो मारुतं मत्सि देवान्मत्सि द्यावापृथिवी देव सोम ॥

9.097.43a ऋजुः पवस्व वृजिनस्य हन्तापामीवां बाधमानो मृधश्च ।

9.097.43c अभिश्रीणन्पयः पयसाभि गोनामिन्द्रस्य त्वं तव वयं सखायः ॥

9.097.44a मध्वः सूदं पवस्व वस्व उत्सं वीरं च न आ पवस्वा भगं च ।

9.097.44c स्वदस्वेन्द्राय पवमान इन्दो रयिं च न आ पवस्वा समुद्रात् ॥

9.097.45a सोमः सुतो धारयात्यो न हित्वा सिन्धुर्न निम्नमभि वाज्यक्षाः ।

9.097.45c आ योनिं वन्यमसदत्पुनानः समिन्दुर्गोभिरसरत्समद्भिः ॥

9.097.46a एष स्य ते पवत इन्द्र सोमश्चमूषु धीर उशते तवस्वान् ।

9.097.46c स्वर्चक्षा रथिरः सत्यशुष्मः कामो न यो देवयतामसर्जि ॥

9.097.47a एष प्रत्नेन वयसा पुनानस्तिरो वर्पांसि दुहितुर्दधानः ।

9.097.47c वसानः शर्म त्रिवरूथमप्सु होतेव याति समनेषु रेभन् ॥

9.097.48a नू नस्त्वं रथिरो देव सोम परि स्रव चम्वोः पूयमानः ।

9.097.48c अप्सु स्वादिष्ठो मधुमाँ ऋतावा देवो न यः सविता सत्यमन्मा ॥

9.097.49a अभि वायुं वीत्यर्षा गृणानो३ऽभि मित्रावरुणा पूयमानः ।

9.097.49c अभी नरं धीजवनं रथेष्ठामभीन्द्रं वृषणं वज्रबाहुम् ॥

9.097.50a अभि वस्त्रा सुवसनान्यर्षाभि धेनूः सुदुघाः पूयमानः ।

9.097.50c अभि चन्द्रा भर्तवे नो हिरण्याभ्यश्वान्रथिनो देव सोम ॥

9.097.51a अभी नो अर्ष दिव्या वसून्यभि विश्वा पार्थिवा पूयमानः ।

9.097.51c अभि येन द्रविणमश्नवामाभ्यार्षेयं जमदग्निवन्नः ॥

9.097.52a अया पवा पवस्वैना वसूनि माँश्चत्व इन्दो सरसि प्र धन्व ।

9.097.52c ब्रध्नश्चिदत्र वातो न जूतः पुरुमेधश्चित्तकवे नरं दात् ॥

9.097.53a उत न एना पवया पवस्वाधि श्रुते श्रवाय्यस्य तीर्थे ।

9.097.53c षष्टिं सहस्रा नैगुतो वसूनि वृक्षं न पक्वं धूनवद्रणाय ॥

9.097.54a महीमे अस्य वृषनाम शूषे माँश्चत्वे वा पृशने वा वधत्रे ।

9.097.54c अस्वापयन्निगुतः स्नेहयच्चापामित्राँ अपाचितो अचेतः ॥

9.097.55a सं त्री पवित्रा विततान्येष्यन्वेकं धावसि पूयमानः ।

9.097.55c असि भगो असि दात्रस्य दातासि मघवा मघवद्भ्य इन्दो ॥

9.097.56a एष विश्ववित्पवते मनीषी सोमो विश्वस्य भुवनस्य राजा ।

9.097.56c द्रप्साँ ईरयन्विदथेष्विन्दुर्वि वारमव्यं समयाति याति ॥

9.097.57a इन्दुं रिहन्ति महिषा अदब्धाः पदे रेभन्ति कवयो न गृध्राः ।

9.097.57c हिन्वन्ति धीरा दशभिः क्षिपाभिः समञ्जते रूपमपां रसेन ॥

9.097.58a त्वया वयं पवमानेन सोम भरे कृतं वि चिनुयाम शश्वत् ।

9.097.58c तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥

9.098.01a अभि नो वाजसातमं रयिमर्ष पुरुस्पृहम् ।

9.098.01c इन्दो सहस्रभर्णसं तुविद्युम्नं विभ्वासहम् ॥

9.098.02a परि ष्य सुवानो अव्ययं रथे न वर्माव्यत ।

9.098.02c इन्दुरभि द्रुणा हितो हियानो धाराभिरक्षाः ॥

9.098.03a परि ष्य सुवानो अक्षा इन्दुरव्ये मदच्युतः ।

9.098.03c धारा य ऊर्ध्वो अध्वरे भ्राजा नैति गव्ययुः ॥

9.098.04a स हि त्वं देव शश्वते वसु मर्ताय दाशुषे ।

9.098.04c इन्दो सहस्रिणं रयिं शतात्मानं विवाससि ॥

9.098.05a वयं ते अस्य वृत्रहन्वसो वस्वः पुरुस्पृहः ।

9.098.05c नि नेदिष्ठतमा इषः स्याम सुम्नस्याध्रिगो ॥

9.098.06a द्विर्यं पञ्च स्वयशसं स्वसारो अद्रिसंहतम् ।

9.098.06c प्रियमिन्द्रस्य काम्यं प्रस्नापयन्त्यूर्मिणम् ॥

9.098.07a परि त्यं हर्यतं हरिं बभ्रुं पुनन्ति वारेण ।

9.098.07c यो देवान्विश्वाँ इत्परि मदेन सह गच्छति ॥

9.098.08a अस्य वो ह्यवसा पान्तो दक्षसाधनम् ।

9.098.08c यः सूरिषु श्रवो बृहद्दधे स्वर्ण हर्यतः ॥

9.098.09a स वां यज्ञेषु मानवी इन्दुर्जनिष्ट रोदसी ।

9.098.09c देवो देवी गिरिष्ठा अस्रेधन्तं तुविष्वणि ॥

9.098.10a इन्द्राय सोम पातवे वृत्रघ्ने परि षिच्यसे ।

9.098.10c नरे च दक्षिणावते देवाय सदनासदे ॥

9.098.11a ते प्रत्नासो व्युष्टिषु सोमाः पवित्रे अक्षरन् ।

9.098.11c अपप्रोथन्तः सनुतर्हुरश्चितः प्रातस्ताँ अप्रचेतसः ॥

9.098.12a तं सखायः पुरोरुचं यूयं वयं च सूरयः ।

9.098.12c अश्याम वाजगन्ध्यं सनेम वाजपस्त्यम् ॥

9.099.01a आ हर्यताय धृष्णवे धनुस्तन्वन्ति पौंस्यम् ।

9.099.01c शुक्रां वयन्त्यसुराय निर्णिजं विपामग्रे महीयुवः ॥

9.099.02a अध क्षपा परिष्कृतो वाजाँ अभि प्र गाहते ।

9.099.02c यदी विवस्वतो धियो हरिं हिन्वन्ति यातवे ॥

9.099.03a तमस्य मर्जयामसि मदो य इन्द्रपातमः ।

9.099.03c यं गाव आसभिर्दधुः पुरा नूनं च सूरयः ॥

9.099.04a तं गाथया पुराण्या पुनानमभ्यनूषत ।

9.099.04c उतो कृपन्त धीतयो देवानां नाम बिभ्रतीः ॥

9.099.05a तमुक्षमाणमव्यये वारे पुनन्ति धर्णसिम् ।

9.099.05c दूतं न पूर्वचित्तय आ शासते मनीषिणः ॥

9.099.06a स पुनानो मदिन्तमः सोमश्चमूषु सीदति ।

9.099.06c पशौ न रेत आदधत्पतिर्वचस्यते धियः ॥

9.099.07a स मृज्यते सुकर्मभिर्देवो देवेभ्यः सुतः ।

9.099.07c विदे यदासु संददिर्महीरपो वि गाहते ॥

9.099.08a सुत इन्दो पवित्र आ नृभिर्यतो वि नीयसे ।

9.099.08c इन्द्राय मत्सरिन्तमश्चमूष्वा नि षीदसि ॥

9.100.01a अभी नवन्ते अद्रुहः प्रियमिन्द्रस्य काम्यम् ।

9.100.01c वत्सं न पूर्व आयुनि जातं रिहन्ति मातरः ॥

9.100.02a पुनान इन्दवा भर सोम द्विबर्हसं रयिम् ।

9.100.02c त्वं वसूनि पुष्यसि विश्वानि दाशुषो गृहे ॥

9.100.03a त्वं धियं मनोयुजं सृजा वृष्टिं न तन्यतुः ।

9.100.03c त्वं वसूनि पार्थिवा दिव्या च सोम पुष्यसि ॥

9.100.04a परि ते जिग्युषो यथा धारा सुतस्य धावति ।

9.100.04c रंहमाणा व्यव्ययं वारं वाजीव सानसिः ॥

9.100.05a क्रत्वे दक्षाय नः कवे पवस्व सोम धारया ।

9.100.05c इन्द्राय पातवे सुतो मित्राय वरुणाय च ॥

9.100.06a पवस्व वाजसातमः पवित्रे धारया सुतः ।

9.100.06c इन्द्राय सोम विष्णवे देवेभ्यो मधुमत्तमः ॥

9.100.07a त्वां रिहन्ति मातरो हरिं पवित्रे अद्रुहः ।

9.100.07c वत्सं जातं न धेनवः पवमान विधर्मणि ॥

9.100.08a पवमान महि श्रवश्चित्रेभिर्यासि रश्मिभिः ।

9.100.08c शर्धन्तमांसि जिघ्नसे विश्वानि दाशुषो गृहे ॥

9.100.09a त्वं द्यां च महिव्रत पृथिवीं चाति जभ्रिषे ।

9.100.09c प्रति द्रापिममुञ्चथाः पवमान महित्वना ॥

9.101.01a पुरोजिती वो अन्धसः सुताय मादयित्नवे ।

9.101.01c अप श्वानं श्नथिष्टन सखायो दीर्घजिह्व्यम् ॥

9.101.02a यो धारया पावकया परिप्रस्यन्दते सुतः ।

9.101.02c इन्दुरश्वो न कृत्व्यः ॥

9.101.03a तं दुरोषमभी नरः सोमं विश्वाच्या धिया ।

9.101.03c यज्ञं हिन्वन्त्यद्रिभिः ॥

9.101.04a सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः ।

9.101.04c पवित्रवन्तो अक्षरन्देवान्गच्छन्तु वो मदाः ॥

9.101.05a इन्दुरिन्द्राय पवत इति देवासो अब्रुवन् ।

9.101.05c वाचस्पतिर्मखस्यते विश्वस्येशान ओजसा ॥

9.101.06a सहस्रधारः पवते समुद्रो वाचमीङ्खयः ।

9.101.06c सोमः पती रयीणां सखेन्द्रस्य दिवेदिवे ॥

9.101.07a अयं पूषा रयिर्भगः सोमः पुनानो अर्षति ।

9.101.07c पतिर्विश्वस्य भूमनो व्यख्यद्रोदसी उभे ॥

9.101.08a समु प्रिया अनूषत गावो मदाय घृष्वयः ।

9.101.08c सोमासः कृण्वते पथः पवमानास इन्दवः ॥

9.101.09a य ओजिष्ठस्तमा भर पवमान श्रवाय्यम् ।

9.101.09c यः पञ्च चर्षणीरभि रयिं येन वनामहै ॥

9.101.10a सोमाः पवन्त इन्दवोऽस्मभ्यं गातुवित्तमाः ।

9.101.10c मित्राः सुवाना अरेपसः स्वाध्यः स्वर्विदः ॥

9.101.11a सुष्वाणासो व्यद्रिभिश्चिताना गोरधि त्वचि ।

9.101.11c इषमस्मभ्यमभितः समस्वरन्वसुविदः ॥

9.101.12a एते पूता विपश्चितः सोमासो दध्याशिरः ।

9.101.12c सूर्यासो न दर्शतासो जिगत्नवो ध्रुवा घृते ॥

9.101.13a प्र सुन्वानस्यान्धसो मर्तो न वृत तद्वचः ।

9.101.13c अप श्वानमराधसं हता मखं न भृगवः ॥

9.101.14a आ जामिरत्के अव्यत भुजे न पुत्र ओण्योः ।

9.101.14c सरज्जारो न योषणां वरो न योनिमासदम् ॥

9.101.15a स वीरो दक्षसाधनो वि यस्तस्तम्भ रोदसी ।

9.101.15c हरिः पवित्रे अव्यत वेधा न योनिमासदम् ॥

9.101.16a अव्यो वारेभिः पवते सोमो गव्ये अधि त्वचि ।

9.101.16c कनिक्रदद्वृषा हरिरिन्द्रस्याभ्येति निष्कृतम् ॥

9.102.01a क्राणा शिशुर्महीनां हिन्वन्नृतस्य दीधितिम् ।

9.102.01c विश्वा परि प्रिया भुवदध द्विता ॥

9.102.02a उप त्रितस्य पाष्योरभक्त यद्गुहा पदम् ।

9.102.02c यज्ञस्य सप्त धामभिरध प्रियम् ॥

9.102.03a त्रीणि त्रितस्य धारया पृष्ठेष्वेरया रयिम् ।

9.102.03c मिमीते अस्य योजना वि सुक्रतुः ॥

9.102.04a जज्ञानं सप्त मातरो वेधामशासत श्रिये ।

9.102.04c अयं ध्रुवो रयीणां चिकेत यत् ॥

9.102.05a अस्य व्रते सजोषसो विश्वे देवासो अद्रुहः ।

9.102.05c स्पार्हा भवन्ति रन्तयो जुषन्त यत् ॥

9.102.06a यमी गर्भमृतावृधो दृशे चारुमजीजनन् ।

9.102.06c कविं मंहिष्ठमध्वरे पुरुस्पृहम् ॥

9.102.07a समीचीने अभि त्मना यह्वी ऋतस्य मातरा ।
9.102.07c तन्वाना यज्ञमानुषग्यदञ्जते ॥
9.102.08a क्रत्वा शुक्रेभिरक्षभिर्ऋणोरप व्रजं दिवः ।
9.102.08c हिन्वन्नृतस्य दीधितिं प्राध्वरे ॥

9.103.01a प्र पुनानाय वेधसे सोमाय वच उद्यतम् ।
9.103.01c भृतिं न भरा मतिभिर्जुजोषते ॥
9.103.02a परि वाराण्यव्यया गोभिरञ्जानो अर्षति ।
9.103.02c त्री षधस्था पुनानः कृणुते हरिः ॥
9.103.03a परि कोशं मधुश्चुतमव्यये वारे अर्षति ।
9.103.03c अभि वाणीर्ऋषीणां सप्त नूषत ॥
9.103.04a परि णेता मतीनां विश्वदेवो अदाभ्यः ।
9.103.04c सोमः पुनानश्चम्वोर्विशद्धरिः ॥
9.103.05a परि दैवीरनु स्वधा इन्द्रेण याहि सरथम् ।
9.103.05c पुनानो वाघद्वाघद्भिरमर्त्यः ॥
9.103.06a परि सप्तिर्न वाजयुर्देवो देवेभ्यः सुतः ।
9.103.06c व्यानशिः पवमानो वि धावति ॥

9.104.01a सखाय आ नि षीदत पुनानाय प्र गायत ।

9.104.01c शिशुं न यज्ञैः परि भूषत श्रिये ॥

9.104.02a समी वत्सं न मातृभिः सृजता गयसाधनम् ।

9.104.02c देवाव्यं१ मदमभि द्विशवसम् ॥

9.104.03a पुनाता दक्षसाधनं यथा शर्धाय वीतये ।

9.104.03c यथा मित्राय वरुणाय शंतमः ॥

9.104.04a अस्मभ्यं त्वा वसुविदमभि वाणीरनूषत ।

9.104.04c गोभिष्टे वर्णमभि वासयामसि ॥

9.104.05a स नो मदानां पत इन्दो देवप्सरा असि ।

9.104.05c सखेव सख्ये गातुवित्तमो भव ॥

9.104.06a सनेमि कृध्य१स्मदा रक्षसं कं चिदत्रिणम् ।

9.104.06c अपादेवं द्वयुमंहो युयोधि नः ॥

9.105.01a तं वः सखायो मदाय पुनानमभि गायत ।

9.105.01c शिशुं न यज्ञैः स्वदयन्त गूर्तिभिः ॥

9.105.02a सं वत्स इव मातृभिरिन्दुर्हिन्वानो अज्यते ।

9.105.02c देवावीर्मदो मतिभिः परिष्कृतः ॥

9.105.03a अयं दक्षाय साधनोऽयं शर्धाय वीतये ।

9.105.03c अयं देवेभ्यो मधुमत्तमः सुतः ॥

9.105.04a गोमन्न इन्दो अश्ववत्सुतः सुदक्ष धन्व ।

9.105.04c शुचिं ते वर्णमधि गोषु दीधरम् ॥

9.105.05a स नो हरीणां पत इन्दो देवप्सरस्तमः ।

9.105.05c सखेव सख्ये नर्यो रुचे भव ॥

9.105.06a सनेमि त्वमस्मदाँ अदेवं कं चिदत्रिणम् ।

9.105.06c साह्वाँ इन्दो परि बाधो अप द्वयुम् ॥

9.106.01a इन्द्रमच्छ सुता इमे वृषणं यन्तु हरयः ।

9.106.01c श्रुष्टी जातास इन्दवः स्वर्विदः ॥

9.106.02a अयं भराय सानसिरिन्द्राय पवते सुतः ।

9.106.02c सोमो जैत्रस्य चेतति यथा विदे ॥

9.106.03a अस्येदिन्द्रो मदेष्वा ग्राभं गृभ्णीत सानसिम् ।

9.106.03c वज्रं च वृषणं भरत्समप्सुजित् ॥

9.106.04a प्र धन्वा सोम जागृविरिन्द्रायेन्दो परि स्रव ।

9.106.04c द्युमन्तं शुष्ममा भरा स्वर्विदम् ॥

9.106.05a इन्द्राय वृषणं मदं पवस्व विश्वदर्शतः ।

9.106.05c सहस्रयामा पथिकृद्विचक्षणः ॥

9.106.06a अस्मभ्यं गातुवित्तमो देवेभ्यो मधुमत्तमः ।

9.106.06c सहस्रं याहि पथिभिः कनिक्रदत् ॥

9.106.07a पवस्व देववीतय इन्दो धाराभिरोजसा ।

9.106.07c आ कलशं मधुमान्सोम नः सदः ॥

9.106.08a तव द्रप्सा उदप्रुत इन्द्रं मदाय वावृधुः ।

9.106.08c त्वां देवासो अमृताय कं पपुः ॥

9.106.09a आ नः सुतास इन्दवः पुनाना धावता रयिम् ।

9.106.09c वृष्टिद्यावो रीत्यापः स्वर्विदः ॥

9.106.10a सोमः पुनान ऊर्मिणाव्यो वारं वि धावति ।

9.106.10c अग्रे वाचः पवमानः कनिक्रदत् ॥

9.106.11a धीभिर्हिन्वन्ति वाजिनं वने क्रीळन्तमत्यविम् ।

9.106.11c अभि त्रिपृष्ठं मतयः समस्वरन् ॥

9.106.12a असर्जि कलशाँ अभि मीळ्हे सप्तिर्न वाजयुः ।

9.106.12c पुनानो वाचं जनयन्नसिष्यदत् ॥

9.106.13a पवते हर्यतो हरिरति ह्वरांसि रंह्या ।

9.106.13c अभ्यर्षन्स्तोतृभ्यो वीरवद्यशः ॥

9.106.14a अया पवस्व देवयुर्मधोर्धारा असृक्षत ।

9.106.14c रेभन्पवित्रं पर्येषि विश्वतः ॥

9.107.01a परीतो षिञ्चता सुतं सोमो य उत्तमं हविः ।

9.107.01c दधन्वाँ यो नर्यो अप्स्वन्तरा सुषाव सोममद्रिभिः ॥

9.107.02a नूनं पुनानोऽविभिः परि स्रवादब्धः सुरभिन्तरः ।

9.107.02c सुते चित्त्वाप्सु मदामो अन्धसा श्रीणन्तो गोभिरुत्तरम् ॥

9.107.03a परि सुवानश्चक्षसे देवमादनः क्रतुरिन्दुर्विचक्षणः ॥

9.107.04a पुनानः सोम धारयापो वसानो अर्षसि ।

9.107.04c आ रत्नधा योनिमृतस्य सीदस्युत्सो देव हिरण्ययः ॥

9.107.05a दुहान ऊधर्दिव्यं मधु प्रियं प्रत्नं सधस्थमासदत् ।

9.107.05c आपृच्छ्यं धरुणं वाज्यर्षति नृभिर्धूतो विचक्षणः ॥

9.107.06a पुनानः सोम जागृविरव्यो वारे परि प्रियः ।

9.107.06c त्वं विप्रो अभवोऽङ्गिरस्तमो मध्वा यज्ञं मिमिक्ष नः ॥

9.107.07a सोमो मीढ्वान्पवते गातुवित्तम ऋषिर्विप्रो विचक्षणः ।

9.107.07c त्वं कविरभवो देववीतम आ सूर्यं रोहयो दिवि ॥

9.107.08a सोम उ षुवाणः सोतृभिरधि ष्णुभिरवीनाम् ।

9.107.08c अश्वयेव हरिता याति धारया मन्द्रया याति धारया ॥

9.107.09a अनूपे गोमान्गोभिरक्षाः सोमो दुग्धाभिरक्षाः ।

9.107.09c समुद्रं न संवरणान्यग्मन्मन्दी मदाय तोशते ॥

9.107.10a आ सोम सुवानो अद्रिभिस्तिरो वाराण्यव्यया ।

9.107.10c जनो न पुरि चम्वोर्विशद्धरिः सदो वनेषु दधिषे ॥

9.107.11a स मामृजे तिरो अण्वानि मेष्यो मीळ्हे सप्तिर्न वाजयुः ।

9.107.11c अनुमाद्यः पवमानो मनीषिभिः सोमो विप्रेभिर्ऋक्वभिः ॥

9.107.12a प्र सोम देववीतये सिन्धुर्न पिप्ये अर्णसा ।

9.107.12c अंशोः पयसा मदिरो न जागृविरच्छा कोशं मधुश्चुतम् ॥

9.107.13a आ हर्यतो अर्जुने अत्के अव्यत प्रियः सूनुर्न मर्ज्यः ।

9.107.13c तमीं हिन्वन्त्यपसो यथा रथं नदीष्वा गभस्त्योः ॥

9.107.14a अभि सोमास आयवः पवन्ते मद्यं मदम् ।

9.107.14c समुद्रस्याधि विष्टपि मनीषिणो मत्सरासः स्वर्विदः ॥

9.107.15a तरत्समुद्रं पवमान ऊर्मिणा राजा देव ऋतं बृहत् ।

9.107.15c अर्षन्मित्रस्य वरुणस्य धर्मणा प्र हिन्वान ऋतं बृहत् ॥

9.107.16a नृभिर्येमानो हर्यतो विचक्षणो राजा देवः समुद्रियः ॥

9.107.17a इन्द्राय पवते मदः सोमो मरुत्वते सुतः ।

9.107.17c सहस्रधारो अत्यव्यमर्षति तमी मृजन्त्यायवः ॥

9.107.18a पुनानश्चमू जनयन्मतिं कविः सोमो देवेषु रण्यति ।

9.107.18c अपो वसानः परि गोभिरुत्तरः सीदन्वनेष्वव्यत ॥

9.107.19a तवाहं सोम रारण सख्य इन्दो दिवेदिवे ।

9.107.19c पुरूणि बभ्रो नि चरन्ति मामव परिधीँरति ताँ इहि ॥

9.107.20a उताहं नक्तमुत सोम ते दिवा सख्याय बभ्र ऊधनि ।

9.107.20c घृणा तपन्तमति सूर्यं परः शकुना इव पप्तिम ॥

9.107.21a मृज्यमानः सुहस्त्य समुद्रे वाचमिन्वसि ।

9.107.21c रयिं पिशङ्गं बहुलं पुरुस्पृहं पवमानाभ्यर्षसि ॥

9.107.22a मृजानो वारे पवमानो अव्यये वृषाव चक्रदो वने ।

9.107.22c देवानां सोम पवमान निष्कृतं गोभिरञ्जानो अर्षसि ॥

9.107.23a पवस्व वाजसातयेऽभि विश्वानि काव्या ।

9.107.23c त्वं समुद्रं प्रथमो वि धारयो देवेभ्यः सोम मत्सरः ॥

9.107.24a स तू पवस्व परि पार्थिवं रजो दिव्या च सोम धर्मभिः ।

9.107.24c त्वां विप्रासो मतिभिर्विचक्षण शुभ्रं हिन्वन्ति धीतिभिः ॥

9.107.25a पवमाना असृक्षत पवित्रमति धारया ।

9.107.25c मरुत्वन्तो मत्सरा इन्द्रिया हया मेधामभि प्रयांसि च ॥

9.107.26a अपो वसानः परि कोशमर्षतीन्दुर्हियानः सोतृभिः ।

9.107.26c जनयञ्ज्योतिर्मन्दना अवीवशद्गाः कृण्वानो न निर्णिजम् ॥

9.108.01a पवस्व मधुमत्तम इन्द्राय सोम क्रतुवित्तमो मदः ।

9.108.01c महि द्युक्षतमो मदः ॥

9.108.02a यस्य ते पीत्वा वृषभो वृषायतेऽस्य पीता स्वर्विदः ।

9.108.02c स सुप्रकेतो अभ्यक्रमीदिषोऽच्छा वाजं नैतशः ॥

9.108.03a त्वं ह्यङ्ग दैव्या पवमान जनिमानि द्युमत्तमः ।

9.108.03c अमृतत्वाय घोषयः ॥

9.108.04a येना नवग्वो दध्यङ्ङपोर्णुते येन विप्रास आपिरे ।

9.108.04c देवानां सुम्ने अमृतस्य चारुणो येन श्रवांस्यानशुः ॥

9.108.05a एष स्य धारया सुतोऽव्यो वारेभिः पवते मदिन्तमः ।

9.108.05c क्रीळन्नूर्मिरपामिव ॥

9.108.06a य उस्रिया अप्या अन्तरश्मनो निर्गा अकृन्तदोजसा ।

9.108.06c अभि व्रजं तत्निषे गव्यमश्व्यं वर्मीव धृष्णवा रुज ॥

9.108.07a आ सोता परि षिञ्चताश्वं न स्तोममप्तुरं रजस्तुरम् ।

9.108.07c वनक्रक्षमुदप्रुतम् ॥

9.108.08a सहस्रधारं वृषभं पयोवृधं प्रियं देवाय जन्मने ।

9.108.08c ऋतेन य ऋतजातो विवावृधे राजा देव ऋतं बृहत् ॥

9.108.09a अभि द्युम्नं बृहद्यश इषस्पते दिदीहि देव देवयुः ।

9.108.09c वि कोशं मध्यमं युव ॥

9.108.10a आ वच्यस्व सुदक्ष चम्वोः सुतो विशां वह्निर्न विश्पतिः ।

9.108.10c वृष्टिं दिवः पवस्व रीतिमपां जिन्वा गविष्टये धियः ॥

9.108.11a एतमु त्यं मदच्युतं सहस्रधारं वृषभं दिवो दुहुः ।

9.108.11c विश्वा वसूनि बिभ्रतम् ॥

9.108.12a वृषा वि जज्ञे जनयन्नमर्त्यः प्रतपञ्ज्योतिषा तमः ।

9.108.12c स सुष्टुतः कविभिर्निर्णिजं दधे त्रिधात्वस्य दंससा ॥

9.108.13a स सुन्वे यो वसूनां यो रायामानेता य इळानाम् ।

9.108.13c सोमो यः सुक्षितीनाम् ॥

9.108.14a यस्य न इन्द्रः पिबाद्यस्य मरुतो यस्य वार्यमणा भगः ।

9.108.14c आ येन मित्रावरुणा करामह एन्द्रमवसे महे ॥

9.108.15a इन्द्राय सोम पातवे नृभिर्यतः स्वायुधो मदिन्तमः ।

9.108.15c पवस्व मधुमत्तमः ॥

9.108.16a इन्द्रस्य हार्दि सोमधानमा विश समुद्रमिव सिन्धवः ।

9.108.16c जुष्टो मित्राय वरुणाय वायवे दिवो विष्टम्भ उत्तमः ॥

9.109.01a परि प्र धन्वेन्द्राय सोम स्वादुर्मित्राय पूष्णे भगाय ॥

9.109.02a इन्द्रस्ते सोम सुतस्य पेयाः क्रत्वे दक्षाय विश्वे च देवाः ॥

9.109.03a एवामृताय महे क्षयाय स शुक्रो अर्ष दिव्यः पीयूषः ॥

9.109.04a पवस्व सोम महान्समुद्रः पिता देवानां विश्वाभि धाम ॥

9.109.05a शुक्रः पवस्व देवेभ्यः सोम दिवे पृथिव्यै शं च प्रजायै ॥

9.109.06a दिवो धर्तासि शुक्रः पीयूषः सत्ये विधर्मन्वाजी पवस्व ॥

9.109.07a पवस्व सोम द्युम्नी सुधारो महामवीनामनु पूर्व्यः ॥

9.109.08a नृभिर्येमानो जज्ञानः पूतः क्षरद्विश्वानि मन्द्रः स्वर्वित् ॥

9.109.09a इन्दुः पुनानः प्रजामुराणः करद्विश्वानि द्रविणानि नः ॥

9.109.10a पवस्व सोम क्रत्वे दक्षायाश्वो न निक्तो वाजी धनाय ॥

9.109.11a तं ते सोतारो रसं मदाय पुनन्ति सोमं महे द्युम्नाय ॥

9.109.12a शिशुं जज्ञानं हरिं मृजन्ति पवित्रे सोमं देवेभ्य इन्दुम् ॥

9.109.13a इन्दुः पविष्ट चारुर्मदायापामुपस्थे कविर्भगाय ॥

9.109.14a बिभर्ति चार्विन्द्रस्य नाम येन विश्वानि वृत्रा जघान ॥

9.109.15a पिबन्त्यस्य विश्वे देवासो गोभिः श्रीतस्य नृभिः सुतस्य ॥

9.109.16a प्र सुवानो अक्षाः सहस्रधारस्तिरः पवित्रं वि वारमव्यम् ॥

9.109.17a स वाज्यक्षाः सहस्ररेता अद्भिर्मृजानो गोभिः श्रीणानः ॥

9.109.18a प्र सोम याहीन्द्रस्य कुक्षा नृभिर्येमानो अद्रिभिः सुतः ॥

9.109.19a असर्जि वाजी तिरः पवित्रमिन्द्राय सोमः सहस्रधारः ॥

9.109.20a अञ्जन्त्येनं मध्वो रसेनेन्द्राय वृष्ण इन्दुं मदाय ॥

9.109.21a देवेभ्यस्त्वा वृथा पाजसेऽपो वसानं हरिं मृजन्ति ॥

9.109.22a इन्दुरिन्द्राय तोशते नि तोशते श्रीणन्नुग्रो रिणन्नपः ॥

9.110.01a पर्यू षु प्र धन्व वाजसातये परि वृत्राणि सक्षणिः ।

9.110.01c द्विषस्तरध्या ऋणया न ईयसे ॥

9.110.02a अनु हि त्वा सुतं सोम मदामसि महे समर्यराज्ये ।

9.110.02c वाजाँ अभि पवमान प्र गाहसे ॥

9.110.03a अजीजनो हि पवमान सूर्यं विधारे शक्मना पयः ।

9.110.03c गोजीरया रंहमाणः पुरंध्या ॥

9.110.04a अजीजनो अमृत मर्त्येष्वाँ ऋतस्य धर्मन्नमृतस्य चारुणः ।

9.110.04c सदासरो वाजमच्छा सनिष्यदत् ॥

9.110.05a अभ्यभि हि श्रवसा ततर्दिथोत्सं न कं चिज्जनपानमक्षितम् ।

9.110.05c शर्याभिर्न भरमाणो गभस्त्योः ॥

9.110.06a आदीं के चित्पश्यमानास आप्यं वसुरुचो दिव्या अभ्यनूषत ।

9.110.06c वारं न देवः सविता व्यूर्णुते ॥

9.110.07a त्वे सोम प्रथमा वृक्तबर्हिषो महे वाजाय श्रवसे धियं दधुः ।

9.110.07c स त्वं नो वीर वीर्याय चोदय ॥

9.110.08a दिवः पीयूषं पूर्व्यं यदुक्थ्यं महो गाहाद्दिव आ निरधुक्षत ।

9.110.08c इन्द्रमभि जायमानं समस्वरन् ॥

9.110.09a अध यदिमे पवमान रोदसी इमा च विश्वा भुवनाभि मज्मना ।

9.110.09c यूथे न निष्ठा वृषभो वि तिष्ठसे ॥

9.110.10a सोमः पुनानो अव्यये वारे शिशुर्न क्रीळन्पवमानो अक्षाः ।

9.110.10c सहस्रधारः शतवाज इन्दुः ॥

9.110.11a एष पुनानो मधुमाँ ऋतावेन्द्रायेन्दुः पवते स्वादुरूर्मिः ।

9.110.11c वाजसनिर्वरिवोविद्वयोधाः ॥

9.110.12a स पवस्व सहमानः पृतन्यून्सेधन्रक्षांस्यप दुर्गहाणि ।

9.110.12c स्वायुधः सासह्वान्सोम शत्रून् ॥

9.111.01a अया रुचा हरिण्या पुनानो विश्वा द्वेषांसि तरति स्वयुग्वभिः सूरो न स्वयुग्वभिः ।

9.111.01d धारा सुतस्य रोचते पुनानो अरुषो हरिः ।

9.111.01f विश्वा यद्रूपा परियात्यृक्वभिः सप्तास्येभिरृक्वभिः ॥

9.111.02a त्वं त्यत्पणीनां विदो वसु सं मातृभिर्मर्जयसि स्व आ दम ऋतस्य धीतिभिर्दमे ।

9.111.02d परावतो न साम तद्यत्रा रणन्ति धीतयः ।

9.111.02f त्रिधातुभिररुषीभिर्वयो दधे रोचमानो वयो दधे ॥

9.111.03a पूर्वामनु प्रदिशं याति चेकितत्सं रश्मिभिर्यतते दर्शतो रथो दैव्यो दर्शतो रथः ।

9.111.03d अग्मन्नुक्थानि पौंस्येन्द्रं जैत्राय हर्षयन् ।

9.111.03f वज्रश्च यद्भवथो अनपच्युता समत्स्वनपच्युता ॥

9.112.01a नानानं वा उ नो धियो वि व्रतानि जनानाम् ।

9.112.01c तक्षा रिष्टं रुतं भिषग्ब्रह्मा सुन्वन्तमिच्छतीन्द्रायेन्दो परि स्रव ॥

9.112.02a जरतीभिरोषधीभिः पर्णेभिः शकुनानाम् ।

9.112.02c कार्मारो अश्मभिर्द्युभिर्हिरण्यवन्तमिच्छतीन्द्रायेन्दो परि स्रव ॥

9.112.03a कारुरहं ततो भिषगुपलप्रक्षिणी नना ।

9.112.03c नानाधियो वसूयवोऽनु गा इव तस्थिमेन्द्रायेन्दो परि स्रव ॥

9.112.04a अश्वो वोळ्हा सुखं रथं हसनामुपमन्त्रिणः ।

9.112.04c शेपो रोमण्वन्तौ भेदौ वारिन्मण्डूक इच्छतीन्द्रायेन्दो परि स्रव ॥

9.113.01a शर्यणावति सोममिन्द्रः पिबतु वृत्रहा ।

9.113.01c बलं दधान आत्मनि करिष्यन्वीर्यं महदिन्द्रायेन्दो परि स्रव ॥

9.113.02a आ पवस्व दिशां पत आर्जीकात्सोम मीढ्वः ।

9.113.02c ऋतवाकेन सत्येन श्रद्धया तपसा सुत इन्द्रायेन्दो परि स्रव ॥

9.113.03a पर्जन्यवृद्धं महिषं तं सूर्यस्य दुहिताभरत् ।

9.113.03c तं गन्धर्वाः प्रत्यगृभ्णन्तं सोमे रसमादधुरिन्द्रायेन्दो परि स्रव ॥

9.113.04a ऋतं वदन्नृतद्युम्न सत्यं वदन्सत्यकर्मन् ।

9.113.04c श्रद्धां वदन्सोम राजन्धात्रा सोम परिष्कृत इन्द्रायेन्दो परि स्रव ॥

9.113.05a सत्यमुग्रस्य बृहतः सं स्रवन्ति संस्रवाः ।

9.113.05c सं यन्ति रसिनो रसाः पुनानो ब्रह्मणा हर इन्द्रायेन्दो परि स्रव ॥

9.113.06a यत्र ब्रह्मा पवमान छन्दस्यां३ वाचं वदन् ।

9.113.06c ग्राव्णा सोमे महीयते सोमेनानन्दं जनयन्निन्द्रायेन्दो परि स्रव ॥

9.113.07a यत्र ज्योतिरजस्रं यस्मिँ लोके स्वर्हितम् ।

9.113.07c तस्मिन्मां धेहि पवमानामृते लोके अक्षित इन्द्रायेन्दो परि स्रव ॥

9.113.08a यत्र राजा वैवस्वतो यत्रावरोधनं दिवः ।

9.113.08c यत्रामूर्यह्वतीरापस्तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव ॥

9.113.09a यत्रानुकामं चरणं त्रिनाके त्रिदिवे दिवः ।

9.113.09c लोका यत्र ज्योतिष्मन्तस्तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव ॥

9.113.10a यत्र कामा निकामाश्च यत्र ब्रध्नस्य विष्टपम् ।

9.113.10c स्वधा च यत्र तृप्तिश्च तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव ॥

9.113.11a यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते ।

9.113.11c कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधीन्द्रायेन्दो परि स्रव ॥

9.114.01a य इन्दोः पवमानस्यानु धामान्यक्रमीत् ।

9.114.01c तमाहुः सुप्रजा इति यस्ते सोमाविधन्मन इन्द्रायेन्दो परि स्रव ॥

9.114.02a ऋषे मन्त्रकृतां स्तोमैः कश्यपोद्वर्धयन्गिरः ।

9.114.02c सोमं नमस्य राजानं यो जज्ञे वीरुधां पतिरिन्द्रायेन्दो परि स्रव ॥

9.114.03a सप्त दिशो नानासूर्याः सप्त होतार ऋत्विजः ।

9.114.03c देवा आदित्या ये सप्त तेभिः सोमाभि रक्ष न इन्द्रायेन्दो परि स्रव ॥

9.114.04a यत्ते राजञ्छृतं हविस्तेन सोमाभि रक्ष नः ।

9.114.04c अरातीवा मा नस्तारीन्मो च नः किं चनाममदिन्द्रायेन्दो परि स्रव ॥

Notes by Detlef Eichler (detlefeichler@googlemail.com):

1. Please note that this PDF file is not for commercial use and released only for personal scholarly activity.

2. This Devanāgarī version of Rigveda is from an ITRANS file which I have created on the basis of The Aufrecht/van Nooten/Holland (Samhita) version of the Rigveda. (http://www.people.fas.harvard.edu/~witzel/onlineRV.htm)

3. The font used for the Rigveda text is Ancient Sanskrit 99. For the numbers of Maṇḍala, Sūkta, and Mantra at the beginning of each line (1.001.01a) the font Times New Roman is used.

4. Last updated: 26 March 2009